00138938

BOMBAY BRANCH
OF THE
ROYAL ASIATIC SOCIETY.
TOWN HALL, BOMBAY.

Digitized with financial assistance from
Observer Research Foundation
on 22 February, 2019

45

PATANJALI'S MAHÂBHÁSHYA

WITH

KAIYYAṬA'S BHÂSHYAPRADÎPA.

TB·e·32

(103525).

2521
1932

PATANJALI'S MAHÂBHÂSHYA

WITH

KAIYYAṬA'S BHÂSHYAPRADÎPA.

REPRODUCED BY PHOTO-LITHOGRAPHY

UNDER THE SUPERVISION OF

PROFESSOR T. H. GOLDSTÜCKER.

138938
ac

FROM AN UNDATED MANUSCRIPT.

IN THREE VOLUMES.

VOL. I.

TB.e.32

LONDON:
INDIA MUSEUM,
1874.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

O
4912-5
Pat/Pat
00138938

PREFACE.

THE late Professor J. Ballantyne was the first Sanskrit scholar who conceived and partially carried out the idea of editing the Mahâbhâshya of Patanjali, together with the commentary of Kaiyyaṭa and Nâgojibhaṭṭa's gloss upon the latter. The first volume of this great work, comprising about the tenth part of the whole, was printed at Mirzapore in the year 1855 at the expense of the Government of the N.W. Provinces. The edition, however, was not continued on account of the great expenditure involved; and even had the means been forthcoming, it is more than doubtful whether it could have been carried to a successful termination, as no complete copy of the work was then known to exist in any public library of India or of Europe. This was the more to be regretted as Dr. Ballantyne's scholarly edition, if completed, would have been calculated to supply a pressing want, for according to the highest authorities no other work in the whole range of the unprinted literature of India can at all compare in importance with the Mahâbhâshya. The following observations by the late Professor T. Goldstücker show his opinion on this subject:—"The greatest grammarian of India is Pân'ini, who belongs to that Vedic time which leads us over to the classical period of India. His work, which up to this day has remained the grammatical standard all over India, was criticised and supplemented by Kâtyâyana who (according to the results at which I have arrived) lived in the beginning of the 3rd century B.C.; and his work, the Vârttikas, was again criticised and commented upon by his disciple Patanjali in the Mahâbhâshya, which he wrote in the middle of the 2nd century B.C. Pân'ini, Kâtyâyana, and Patanjali are thus the great grammatical triad of ancient India; and the scientific value of their works surpasses, in my estimation, that of most, if not all other, grammatical works in existence. As Pân'ini's work became a Vedânga, that is, one of the works without which the study of the Vedas was considered to be, and in reality is, impossible, and as Pân'ini without Kâtyâyana and Patanjali would be incomplete and even unintelligible, the Mahâbhâshya, which embodies Kâtyâyana's Vârttikas, is one of the chief works of the whole Sanskrit literature. The most difficult portions of the Mahâbhâshya, which is one of the hardest Sanskrit works to study, were explained by Kaiyyaṭa, and his notes again

were commented upon by Nâgojibhaṭṭa. These two latter works are therefore likewise of great value and importance."

It was not till a few years ago that, through the offices of Dr. F. Hall, three excellent MSS., making up a complete copy, were lent by the well-known archæologist and philanthropist Dr. Bháu Dájí, of Bombay, to Professor Goldstücker, with full permission to use them in any way required for literary purposes. The copies thus lent were regarded by Dr. Goldstücker as by far the best he had ever seen, and he considered that their reproduction would render an invaluable service to Sanskrit literature. As, for various reasons, it was found impracticable to print the work from Dr. Bháu Dájí's copy, Dr. Hall, at Professor Goldstücker's suggestion, brought before the Secretary of State for India in Council the desirability of reproducing these invaluable MSS. in fac-simile by having twelve copies of them photo-lithographed at the establishment connected with my department. This proposition was sanctioned, and subsequently, by Council Minute of Nov. 4, 1869, the scheme was extended to an edition of fifty copies. The execution of the work was entrusted to my assistant Mr. W. Griggs, and Professor Goldstücker himself undertook the laborious task of supervising the correct reproduction of the text, and devoted several hours daily to the correction of the proofs. After almost three years of unremitting labour, the enterprise was approaching its completion when, on the 6th March 1872, death overtook him.

It would be impossible on this occasion not to advert briefly to the great loss which the scientific world, and more especially India, experienced through this event.

In science Goldstücker was one of the foremost representatives of the severe historical method of investigation, according to which so-called internal evidence and merely formal logical agreement are not accepted as sufficient tests of truth, unless supported by an exhaustive historical corroboration. It was a necessary result of this method, and of the deeply conscientious spirit which animated him, that the greatest part of his long scientific career was mainly spent in preparatory work, in elaborating as it were the proper instruments of investigation. It was 25 years ago that the treasures of the India library attracted him to this country, whilst collecting his materials, and his life was cut short at a moment when he had the fullest command over them, and when his long and patient preliminary labours were fast expanding into important results. It may be mentioned that a critica edition of the Mahâbhâshya was one of the works

which he had in course of preparation, and that he was strongly impressed with the importance of the influence which such a work was calculated to exercise on the future course of Sanskrit studies.

As regards India in particular, his studies led him to appreciate and to reinstate in public recognition the gigantic linguistic labours accomplished by Hindu grammarians and commentators. It is as defender of the old literary glories of India, no less than for the untiring and sympathetic care which he extended to natives coming to England, and for the ardour with which he constantly kept in view the practical purpose of abstract linguistic science, that is, its application to the investigation of the living history of the country and to the amelioration of its actual social condition, that his name will always be gratefully remembered in India.

Of the present work upwards of 4,400 pages had passed through his hands; only 230 more were waiting correction before the issue of the entire work. The revision of these pages has been carried on, under Dr. Rost's superintendence, by Miss Amelia Rattenbury, who had already assisted Professor Goldstücker in his fac-simile edition of the Mânava-Kalpa-Sûtra in 1861. The complete work, in six volumes, containing 4,674 pages, is a faithful photo-lithographic reproduction of the three MSS. before referred to, viz. :—

I. Patanjali's Mahâbhâshya, Samvat 1751, one volume, pp. 698. On account of the great difficulties attending the reproduction of this beautiful MS., it was taken in hand after the two other parts.

II. Patanjali's Mahâbhâshya with Kaiyyaṭa's Bhâshyapradîpa. Undated. Three vols., pp. 2,218.

III. Nâgojibhaṭṭa's Bhâshyapradipoddyota on Kaiyyaṭa's Ṭikâ, Samvat 1871. Two vols., pp. 1,758.

In conclusion, I must remark that in the course of execution there arose many technical difficulties of a formidable nature, resulting partly from the condition of the paper of the original MSS., partly from the presence of various marks on their surface, and it is only due to the skill, untiring energy, and intense application of Mr. W. Griggs, during a period of upwards of three years, that the work has finally been brought to completion.

J. FORBES WATSON.

India Museum, India Office,
London, March 1874.

कै॰टी॰
१

श्रीगणेशायनमः योगेनचित्तस्यपदेनवाचांमलंशरीरस्यतुवैद्यकेन योपाकरोत्तंप्रवरंमुनीनांपतंजलिंप्रांजलिरानतोस्मि १ उंनमोभग
वतेवक्रतुंडाय। पाणिनिपतंजलिकात्यायनेभ्योनमः सर्वोकारंनिराकारंविश्वाध्यक्षमतींद्रियं सदसद्रूपतातीतमद्दर्शमायया हृतेः २
ज्ञानलोचनसंलक्ष्यंनारायणमहंविभुं। प्रणम्यपरमात्मानंसर्वविद्याविधायिनं ३ पुरुषाःप्रतिपद्यंतेदेवत्वंयदनुग्रहात्सरस्वतीं
चतांनत्वासर्वविद्याधिदेवतां ४ पदवाक्यप्रमाणाब्धेःपारंयातस्यधीमतः गुरोर्महेश्वरस्यापिकृत्वाचरणवंदनं ५ महाभाष्यार्णवावा
रपारीणंविवृतिप्लवं यथागमंविधास्येहंकैयटोजैयटात्मजः ६ भाष्याब्धिःक्वातिगंभीरःक्वाहंमंदमतिस्ततः छात्राणामुपहास्यत्वंयास्या

अथशब्दानुशासनं। अथेत्ययंशब्दोधिकारार्थःप्रयुज्यते॥ ॥श्रीरामायनमः॥

मिपिशुनात्मनां ७ तथापिहरिबद्धेनसारेणग्रंथसेतुना। क्रममाणःशनैःपारंतस्यप्राप्तास्मिपंगुवत् ८ भाष्यकारोविवरणकारत्वात्व्याक
रणस्यशास्त्रस्यप्रयोजनमाह। अथशब्दानुशासनमिति। प्रयोजनप्रयोजनानितरक्षोहादीनिपश्चाद्वक्ष्यंते। स्ववाक्यमारभ्यात्तद्वयव
मथशब्दंतावद्व्याचष्टे। अथेत्ययमिति। इतिशब्दोथशब्दस्यस्वरूपेवस्थापनायप्रयुक्तः। एवंहिपदांतरैःसामानाधिकरण्येनसंबंधेसति गम॰
अथशब्दोव्याख्यातःस्यात्। स्वरूपेवस्थितस्तुसर्वनाम्नापरामृश्यते अयमितिशब्दइतिस्वरूपकथनंविस्पष्टप्रतिपत्त्यर्थं। अधिकारा १
र्थइति। अधिकारःप्रस्तावोधीप्रतिभास्यप्रयोजनमित्यर्थः। निपातानांद्योतकत्वंवाक्यपदीयेस्थितं ॥ ॥ ॥

अथशब्दस्याधिकारार्थत्वेयोवाक्यार्थःसंपद्यतेतंदर्शयतिशब्दानुशासनमिति। अनेकार्थत्वेपिविषयस्यविशब्दानुशासनस्यप्रारभ्यमाण
×प२ तात्र शब्दसंनिधानेप्रतीयते। व्याकरणस्यवेदांगत्वंथनामशब्दानुशासनमिति। अत्रचवाच्यार्थस्यकर्तुःप्रयोजनाभावात्तुपादानुभयप्रा
प्त्यभावात्नोभयप्राप्तौकर्मणीत्यनेनषष्ठी। अपितुकर्तृकर्मणोःकृतीत्यनेनेतिकर्मणिचेतिसमासप्रतिषेधाप्रसंगात्स्थितत्रब्रह्मो
द्वितसमासःशब्दशब्दस्यसामान्यशब्दत्वाद्विनाप्रकरणादिनाविशेषेवस्थानाभावात्तैःशब्द(काकवाशितादि)नामप्यनुशासनप्रसंगात्र
तिमत्वाहलौकिकानामिति। अत्रपदार्थोतिगतस्यपिपूर्वपदार्थस्यबुध्याप्रविभागात्त्वमर्थः। यथाराजपुरुषशब्देकस्यराजत्वपि। शिष्ट

शब्दानुशासनंनामशास्त्रं अधिकृतंवेदितव्यं केषांशब्दानांलौकिकानांवैदिकानांच तत्रलौ
किकास्तावत् गौरश्वःपुरुषोहस्तीशकुनिर्मृगोब्राह्मणइति वैदिकाःखल्वपि शन्नोदेवी
रभिष्टये इषेत्वोर्जेत्वा अग्निमीळेपुरोहितं अग्नआयाहिवीतयइति अथगौरित्यत्रकःशब्दः

तत्रादौतुव्याकरणस्यवेदांगत्वात्तत्संभवमर्थाद्दिशेषाक्षात्तिरितिमत्वाह। लौकिकानामिति। लोकेविदितादृतिलोकसर्वलोकाभ्यांठञितिठञ्।
अथवाध्यात्मादित्वाठञ्। वेदेभवावैदिकाः। वैदिकानांलौकिकत्वेपिप्राधान्यख्यापनायपृथगुपादानं। यथाब्राह्मणाआया
ताः वशिष्ठोप्यागतइतिवशिष्ठस्य। तेषांतुप्राधान्यं यत्नेतावश्यंपरिहार्यत्वात्। अथवाभाषाशब्दानामेवलौकिकत्वमिति भेदेननिर्देशः
तत्रलौकेयदानुपूर्वीनियमाभावात्सरान्येवदर्शयति। गौरश्वइति। वेदेत्वानुपूर्वीनियमाद्वाक्यान्युदाहरति। शन्नइति। अथगौरित्यत्रकइतिश
ब्दार्थयोरभेदेनलौकेव्यवहारदर्शनात्शब्दस्वरूपनिर्धारणायप्रश्नः। अथगौरित्यत्रेति। विज्ञानेप्रतिभासमानेषुवस्तुषुकःशब्दइत्यर्थः॥

पू२ ×ति२ ×व१

कै०टी० तान्येव वस्तूनि नैकमेवार्थं दर्शयति। किं पुनस्तदिति॥ उच्चार्यमाणमपि निर्दिश्यमानमर्थरूपमापादयन्ति सर्वेनाभावलिनर्ष्येवेरात। त्रिं गत्युपादर्शतिका
२ मवारतः सशब्दस्तिसाहित्येनानिर्दिष्ट॥ नेत्याहेति। भिन्नेष्वभिन्नमित्याद्रव्यं शब्दइति प्रतीतं न अपितु द्रव्यमिति। यदिहि द्रव्यानुशासनं विव
क्षितमभविष्यत् अथ द्रव्यानुशासनमित्येवावक्ष्यत। अनेनैव न्यायेन गुणजातियासामान्यानां निराकृतेऽपि शब्दस्वरूपं दर्शयितुं घोयपूर्व
कं निराकरोति। पस्पशीति। गोशब्दविषये पर्यालोचनवाक्यभूतसमाधानं कृतं। परिहारस्तु पूर्ववत्। तत्रेङ्गितमभिप्रायसूचकः शरीरव्यापारः चे
ष्टितं कायपरिस्पंदः। निमिषितमक्षिव्यापारः। शुक्लो नील इति। द्रव्यस्य भागं वर्णानुवर्तमानमा अभिधायि नी त्रसुक्ला द्यो द्रष्टव्या भिन्ने

किंपुनस्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थे रूपं स शब्दः नेत्याह द्रव्यं नाम तत् यत्तर्हि तदिङ्गितं चेष्टितं निमिषि
तमिति स शब्दः नेत्याह क्रियानाम सा यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति स शब्दः नेत्याह गुणो नाम सः
यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः नेत्याह आकृतिर्नाम सा। कस्तर्हि शब्दः येनोच्चारिते
न सास्नालाङ्गूलककुदखुरविषाणीनां संप्रत्ययो भवति स शब्दः ३ ॥

ष्वभिन्नमिति। अनेन सामान्यस्यैकत्वं कथ्यते। छिन्नेष्वच्छिन्नमिति। अनेन तु नित्यत्वं सामान्यभूतमिति। सत्ताख्ये महासामान्ये गोत्वादेः सामा उ०
न्यविशेषस्योपमानं निर्दिष्टं। महासामान्यमिव सामान्यभूतं भवत्तु शब्दरूपमार्थेयव्याप्तित्वं भवतीति। द्रव्यादिषु निरस्तेषु एकाकृतिकं हीहीति। उच्चारिताह।
× नेत्र मेनोच्चारितेनेति वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थ २
क्यप्रसङ्गात्। आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात्। अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्तत्वात्समुदायाभावाद्वर्णेक स्यैव वाचक
त्वं वाचकत्वे सरोरसरस्वादावर्थप्रतिपत्त्यविशेषप्रसङ्गात् तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः। उ
च्चारितेन प्रकाशितेनेत्यर्थः ३ ॥

अथवेति। अत्र ध्वनिस्फोटयोर्भेदस्य व्यवस्थापितत्वादिहाभेदेन व्यवहारोऽपि न दोषः। ध्वन्यादयोऽन शब्दशब्दवाच्या इत्यत्र ता
त्पर्यात्। ध्वनिं कुर्वन्निति। विधिनिषेधयोरप्रवृत्तविषयत्वात्कथमस्य त्रिभिः संबंधः उच्यते। शब्दं कुर्वन्नविशब्दं कुर्वित्युच्यते। विरा
माशंकायां तन्निरस्त्रयेत यानभिमतशब्दश्रवणे द्वेष्टि तेनोच्यते माशब्दं कार्षीरिति। कानि पुनरिति। किं संभाव्यासनादिवत × पा०२
माशंकायां तन्निस्स्रयेत यानभिमतशब्द। अथ काम्यमिति प्रश्नः यावत् पर्येणपुरुषार्थसाधनतामस्य हारइति लोके लौघदृष्टे दृष्टा आ
व्याकरणाध्ययनं नित्यं कर्म अथ काम्यमिति। तत्र लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति। इहे ली इह्यादादेशे
ष्वेव वैयाकरणाः वैयाकरणास्तु न अमति वेदार्थं चाप्ययस्यति। तत्र लोपागमपोहराहरणं देवा अदुह्रेति। दुहेर्लङि झस्यादादेशे
कृते लोपः तत्रात्मनेपदे झिति तत्त्लोपः बहुलं छंदसीति रुडिस्थिति रूपमेतत्। वर्णविकारो यथा उद्ग्राभं च निग्राभं चेति। हग्रहोर्भ
 छन्दसि
अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते तद्यथा शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते
तस्माद्ध्वनिः शब्दः कानि पुनरस्य शब्दानुशासनस्य प्रयोजनानि रक्षोहागमलघ्वसंदेहाः प्रयोजनं रक्षार्थं वेदानामध्येयं
व्याकरणं लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति। ऊहः खल्वपि न सर्वैर्लिङ्गैः न च सर्वाभिर्विभक्तिभिः
वेदे मन्त्रा निगदिताः ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः तान्नावैयाकरणः शक्नोति विपरिणमयितुं त
 १९ स्माद्अध्येयं व्याकरणं ॥
श्चं दसि हृग्रहोरिति वक्तव्यमिति हकारस्य भकारः उद्ग्राभं इत्यत्र उद्ग्राभं निग्राभं चेति वद्धं दसि अग्निं पूर्वधृक् हे स्तु गुग्रपमननिपातनमयोशितिव चनात् घञ
कः ऊहः खल्वपीति। द्रव्यस्य प्रकृतिकर्तव्यतोपदिशा याऽगान्तरेणोपदीयते सा प्रकृतिः येनोपदीयते सा विकृतिः प्रकृतिवद्विकृतिः क
र्त्तव्येति मीमांसकैः व्यवस्थापितायां प्रकृतिवन्मयास्तामहं चैयाकरणाः सम्यग्विज्ञानातीति तत्राग्नेर्मन्त्रो सि अग्नये त्वा जुष्टं निर्वपामीति त
× नेत्र२ स्मिन्मन्त्रे सौर्ये चरौ निर्वपेद्ब्रह्मवर्चसकाम इति सौर्ये चरौ मन्त्र ऊह्यते सूर्याय त्वा जुष्टं निर्वपामीति विस्तरेण भर्तृहरिणा प्रदर्शित ऊहः ॥

कै.टी. ३ आगम इति। आगमः प्रयोजकः प्रवर्तको नित्यकर्मता व्याकरणाध्ययनस्य दर्शयति। प्रयोजनशब्देन च फलं प्रयोजकं चोच्यते। निष्कारण इति। दृष्टं कारणमनपेक्ष्य धर्मः प्रधानं चेति। पदपदार्थावगमस्य व्याकरणनिमित्तत्वात् तन्मूलत्वाच्चाङ्गान्तराणामर्थावगमस्येति भावः। लघ्वर्थमित्यत्र आक्षेपः लघ्विति ... वाक्यं तेन शब्दज्ञानमस्य प्रयोजनम्। असंदेहार्थमिति। संदेहस्य प्रागभावो ऽत्र वेदितव्यः। न तु प्रध्वंसाभावः। न हि वैयाकरणस्य संशयः कश्चन विनश्यति। इतरस्यैव तदुत्पादात्। स्वरत इति। पूर्वपदप्रकृतिस्व

आगमः खल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान्भवति। लघ्वर्थं चाध्येयं व्याकरणम्। ब्राह्मणेनावश्यं शब्दा ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम्। असंदेहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति। स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति। तस्यां संदेहः। स्थूला चासौ पृषती च स्थूलपृषती। स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति। इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि। तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण इति। तेऽसुराः। तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। म्लेच्छो ह वा एष यदपशब्दः। म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्। तेऽसुराः॥

राद्धहुव्रीह्यर्थावसायस्तत्पुरुषस्य वा इति। मुख्यानि प्रयोजनानि प्रदर्श्य आनुषङ्गिकाणि प्रदर्शयति। इमानि चेति। भूय इति पुनरित्यर्थः आनुषङ्गिकत्वात् ... हेलय इति। ... विद्यते। तत्र केचिदाहुः ... प्रयोगे हेलयो हेलय इति ... भावे च कर्तव्ये तदकरणे म्लेच्छनमिति। ... द्विवचने कार्ये वाक्यद्विर्वचनम्। ... म्लेच्छ इति कर्मणि घञ्॥ सम. २

× शत्रु२ × त्तरा२

दुष्टः शब्द इति। स्वरेणाक्षरतो वा ... मिथ्या प्रयुक्त इति। यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरस्य ... वाग्वज्रो हिंसकत्वात्। यथेन्द्रशत्रुः स्वरदोषाद्यजमानं हिंसितवानिति ... इन्द्रस्याभिचाराय ... इन्द्रशत्रुर्वर्धस्वेति मन्त्र ऊहितः। तत्रेन्द्रस्य शातयिता शमयिता वा भवेति ... इन्द्रशत्रुरिति ... बहुव्रीहिः ... स्वरभेदः। तत्रेन्द्रामित्रत्वलिङ्गे सति इन्द्रस्य शत्रुर्भवेत्यमर्थ इति ... प्रयोक्तव्ये आद्युदात्तत्वं प्रयुक्तमिति अर्थान्तराभिधान

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्। दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। दुष्टः शब्दः। यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्। यदधीतम्। यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः।

नादिर एव तत्रस्य शातयिता संपन्नः। इन्द्रशत्रुत्वस्य च विधेयत्वात् ... यथा राजपुरुष इति। ... अविज्ञातमिति। अविदितस्वरादिसंस्कारत्वादर्थापरिज्ञानाद्वा। निगदेनेति पाठमात्रेण। न तज्ज्वलतीति। निष्फलं भवति। अनर्थकमिति। निष्प्रयोजनम्। यस्तु प्रयुङ्क्त इति। अनेनाभ्युदयहेतुत्वं व्याकरणस्य दर्शयति विशेष इति। स एव शब्दः क्वचिदर्थे केनचित्प्रयुक्तः साधुः अन्यथा त्वसाधुः। यथा स्वशब्दो धनाभावनिमित्तकः साधुः ज्ञातिनिमित्तको साधुः गवि च गोणीशब्दः साधुः ... साधुः ज्ञातिनिमित्तकस्त्वसाधुः॥

करोति। वाग्योगविदः श्रुतत्वोहो वदर्शनाच्च पश्चः। प्रथेव परसत पाशेकाह। वाग्योगविदेवेति। एवमपशब्दज्ञाने पीतिपथा श्लोकिकद्भ्र सेवपा श्लोकिको व्याधिर्भवतिति। हपरीत सेवपात्वारोग्यं तथात्रापि यथोक्तं न्याय्यमितिभावः। भूयांसोल्पीयांसश्चेति परमतापेक्षया प्रक पंप्रत्ययः। वादिमत्य सेवहवः शब्दाः अल्पेपशब्दाः अंतरावस्था स्वकरणस्य स्वामितित न्नत्र। पस्माद्भूयांसोपशब्दाः अल्पीयांसः शब्दाः॥

कः वाग्योगविदेव। कुत एतत्। यो हि शब्दाञ्जानाति अपशब्दानप्यसौ जानाति यथैव हि शब्दज्ञाने धर्मः एवम पशब्दज्ञानेप्यधर्मः अथवा भूयानधर्मः प्राप्नोति। भूयांसोपशब्दा अल्पीयांसः शब्दाः एकैकस्य शब्दस्य बहवोप भ्रंशाः तद्यथा। गौरित्यस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोपभ्रंशाः अथयो वाग्योगवित् अज्ञा नं तस्य शरणं। विषम उपन्यासः नात्यंताया ज्ञानं शरणं भवितुमर्हति यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोपि मन्ये पतितः स्यात। एवं तर्हि सोनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः कः अवाग्योगविदेव। अथयो वाग्योगवित् विज्ञानं तस्य शरणं ॥ ॥ ॥ ॥

अज्ञानमिति। तथा च तिरश्चां ब्रह्महत्यादिफलाभावः। नात्यंतायेति। पुरुषाणां विधिनिषेधयोरधिकारात्तत्परिज्ञाने प्रयत्नस्यन्याय्यत्वात् एव प्रकरणात्सामर्थ्याद्वर्णपिरस्याह। अवाग्योगविदिति। वाग्योगविद्दुष्यति शब्दान्प्रयुङ्क्ते नापशब्दानिति तन्नपूर्वकयोगास्थ्युर ४ यभाग्भवति ॥

×प्र१

श्लोकस्याप्रसिद्धत्वात्पृच्छति। कः पुनरिति। प्रातिपादकार्थप्रश्नस्यात्रनात्पर्यं किंतद्दत्ति यत्रेदं पठितमित्यर्थः अत एव श्लोकाइति प्रत्युत्तरे नोत्तरं अन्यथा स्रो को श्लोका इति वा च्येस्यात। भ्राजो नामलापरिज्ञानादाह। किंच भोइति। अपडुंबरेति। अयं श्लोकः सौत्रामण्यां सुरापानस्य ×ण२ दुष्टत्व सद्भावयति। प्रमत्तगीत इति। प्रमादेनाविमतिपत्रः अबसगीत इत्यर्थः कात्यायनो वति वह आत्ताख्य श्लोकमध्य पठितस्य स्वश्लोक स्य प्लुतिस्त आह्निकात्ति एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति। स्त्रीष्विवेति। प्रत्यभिवादे हि गुरुणा प्लुतः कार्यः पत्तुप्लु तं कर्तुं न जानाति स स्त्रीवद्वक्तव्यः। यमहमिति न त्वभिवादये देवदत्तोहमित्यादिवत्सकृत वा कोलेत्यर्थः। श्रेयमहमिति। अननुकरणं वानिति

कः पुनरिदं पठितं। भ्राजा नाम श्लोकाः। किंच भोः श्लोका अपि प्रमाणं किं चातः यदि प्रमाणं। अयमपि प्रमाणं भवितुमर्हति। यदुदुंबरवर्णानां घटीनां मंडलं महत्। पीतं न ग [redacted] मयेत्स्वर्गं किं तत्क्रतुगतं नयेत्। इति। प्रमत्तगीत एष तत्रभवतो यस्त्वप्र ×ग२ मत्तगीतस्तत्प्रमाणं। यस्तु प्रयुङ्क्ते। अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदे त्। स्त्रीवन्मा भूमेत्यध्येयं व्याकरणं। अविद्वांसः। विभक्तिं कुर्वंति याज्ञिकाः पठंति प्रयाजाः सविभक्तिकाः कार्या इति। न चां तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुं विभक्तिं कुर्वंति। यो वा इमां पदशः स्वरशोक्षरशो वाचं विदधाति स आ र्त्विजीनो भवति आर्त्विजीनाः स्यामित्यध्येयं व्याकरणं। यो वा इमां ॥ ॥

यदमिति गांति त्वासमासेः प्रपाजाः इति पयात्वमं त्राऊद्य मानाग्निश्च प्रकृति विभक्तिषुकार स्य र्थः। यथा समिधः समिधोग्र आज्यस्य व्यंत [redacted] ×ग३
×हि२ अधिरत्र्येति। यस्थाः इति पूर्वपदमिति संल्येक च वचनादिति शब्दः वाक्षराणि। स्वर उदात्तादिः अक्षरश इति। अक्षरं व्यंजनसहितो वा आर्त्विजी नः इति। त्वावि तमर्हत्यार्त्विजीनो यजमानः। ऋत्विक्कर्माहतीति याज्ञिको व्यार्त्विजीनः यजार्त्विज्याय प्रकल्पावेति सूत्रेण यज्ञाः विधानात कर्म्मा र्हणति सो यजस्य नमिति वार्त्तिकेन च खञ्। विद्वान्यजेत। विद्वान्याजयेदिति हि योग्य विदुषो धिकारात ॥ ॥

×क४

कै॰प्र॰ ५ चत्वारीति। शब्दस्य वृषभत्वेन निरूपणं। त्रयः काला इति। लडादिविषयाः। नित्यः कार्यश्चेति। व्यंग्यव्यंजकभेदेन। सप्त विभक्तय इति। सुप्तिङ्व्यर्थे केचित् तिङामप्यत्र ग्रहणं सप्तसंख्यासाम्यात्। त्रिष्विति। विभक्तिशब्दाभिधेयानीति व्याचक्षते। वर्षणादिति। कामानां ज्ञानपूर्वकानुष्ठानफलत्वात् महत्त्वेनेति। मर्त्या इति। चत्वारीत्यनेनैकदेशेन सदृशेन वाक्यात्तत्प्रतीयते। अपर आहेति। परिमितानीति प्रतीयमानेशब्दे ×र२

चत्वारि चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेशेति। चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादास्त्रयः काला भूतभविष्यद्वर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य सप्त विभक्तयः। त्रिधा बद्धः त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतत्। रौतिः शब्दकर्मा। महो देवो मर्त्याँ आविवेशेति। महान्देवः शब्दः। मर्त्या मरणधर्माणो मनुष्याः। तानाविवेश। महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्। अपर आह। चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति। चत्वारि वाक्परिमिता पदानि। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। तानि विदुर्ब्राह्मणा ये मनीषिणः। मनसः ईषिणो मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति। गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषन्ती[redacted]त्यर्थः। तुरीयं वाचो मनुष्या वदन्ति। तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः। चत्वारि ॥

स्विवहनामितिशेषो येपरिमितेतिभवति। परिमितानि परिच्छिन्नान्येतावन्त्येवेत्यर्थः। मनीषिशब्दस्य योगरूढत्वात्कः कथं मनीषिण एव विदन्तीत्याह। गुहेति। अज्ञानमेव गुहा तत्स्थानीत्यर्थः। सुप्तानीवासते ज्ञानात्। व्याकरणाभ्यासेन तानि प्रकाशन्ते। तत्र चतुर्थं परस्तात् एकेकस्य च तुर्भागं मनुष्या अवैयाकरणा वदन्ति। नेङ्गयन्तीत्यस्यैव व्याख्यानं न चेष्टन्ते न निमिषन्तीति ॥ ॥ ॥ ॥ उ॰ ५

×मर्थ२

उत त्व इति। त्वशब्दोऽन्यवाची। उतशब्दोऽपिशब्दस्यार्थे। स च भिन्नक्रमः। प्रत्यक्षेणाशब्दस्वरूपमुपलभमानोऽपि अर्थापरिज्ञानान्न पश्यतीत्यर्थः।
×उतत्वइति२ उतो इति निपातसमाहारः। अविद्वांसमाहेति। अविद्वत्त्वात्पूर्वमर्धं चेत्याहेत्यर्थः। सचतेरिति। षच समवाये। यतस्तितउनास्य दुर्धावः। तितउ परिपवनं। तेन व्याकरणेन वाचोपशब्दा अपनीयन्ते। कसतेरिति। वर्णविपर्ययात्। विकसितत्वाद्दुर्धावत्वम्। ततवदिति। विस्तारयुक्तमित्यर्थः। तन्नवदिति। बहुच्छिद्रम्। धीरास्तितउस्थानीयेन व्याकरणेन वाचं शब्दसमूहमकृषत। अपशब्देभ्यो विविक्तां कृतवन्तः। मन्त्रे यथेष्टं लुङ्। किमर्थमत्र
उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्। उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः। उत त्वः पश्यन्न ददर्श वाचम्। अपि खल्वेकः पश्यन्नपि न पश्यति। अपि खल्वेकः शृण्वन्नपि न शृणोत्येनामिति। अविद्वांसमाहार्धम्। उतो त्वस्मै[redacted] तन्वं विसस्रे। तनुं विवृणुते। जायेव पत्य उशती सुवासाः। तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते। एवं वाग्वाग्विदे स्वात्मानं विवृणुते। वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणम्। सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि। सक्तुः सचतेर्दुर्धावो भवति। कसतेर्वा विपरीता द्विकसितो भवति। तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा। धीरा ध्यानवन्तो मनसा प्रज्ञानेन वाचमकृत। अक्रत[redacted]
अत्रा सखायः सख्यानि जानते। अत्र सखायः सन्तः सख्यानि जानते सायुज्यानि जानते। क्व। य एष दुर्गो मार्ग एकगम्यो वाग्विषयः। के पुनस्ते। वैयाकरणाः। कुत एतत्। भद्रैषां लक्ष्मीर्निहिताधि वाचि। एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। ल ८
द्वी॰ १ लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति। सक्तुमिव। सारस्वतीं। याज्ञिकाः पठन्ति। आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्। सारस्वतीं ॥ ॥

तेतिरूपं। अत्रा सखाय इति। अचि तनुघेति दीर्घः। सखायः समानख्यातयो ये इत्यर्थः। स्वनिरूपणात्। तत्र भेदमिति सत्यते। सख्यानीति सायुज्यानीत्यर्थः। एकगम्य इति। ज्ञानेनैव प्राप्यः। वाचीति। विषयसप्तमी। ब्रह्मणा तत्र लक्ष्मीर्वर्तते तेषु परमार्थसंविज्जनने। तासामेषा निहितेत्यर्थः। प्रायश्चित्तीयामिति। भवार्थे छः। प्रायश्चित्तीयाइति। प्रायश्चित्तं यथा पापशोधनाय क्रियते तस्यैतां विहिताय कर्मणे हिता सक्ति मितो स्यादवा मा

कै॰टी॰ ६

दशम्युत्तरकालमिति। दशम्या उत्तर इति पंचमीति योगविभागात्समासः ततः कालशब्देन बहुव्रीहिः क्रियाविशेषणं चैतत्। दशादि-
नान्यशौचं स्मृतौ। [illegible] दशम्युत्तरकालमित्यत्र [illegible] पठंति दशम्यां पुत्रस्येति। तदपि दशम्यामिति सामीपिकमधिकरणं व्या-
ख्येयं। घोषवदादीति। घोषवंतो वर्णाः [illegible] प्रसिद्धाः। तदादि [illegible] स्यार्थः। त्रिपुरुषानूकमिति

दशम्यां पुत्रस्य [illegible] पठंति। दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यंतरंतस्थमवृद्धं त्रिपुरुषानू-
कमनरिप्रतिष्ठितं। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति। न चांतरेण व्याकरणं कृ-
तस्तद्धिता वा शक्या विज्ञातुं। सुदेवो असि वरुण यस्य ते सप्त सिंधवः। अनुक्षरंति काकुदं सूर्म्यं सुषिरामि-
वा। सुदेवो असि वरुण सत्यदेवोसि यस्य ते सप्त सिंधवः सप्त विभक्तयः। अनुक्षरंति काकुदं। काकुदं तालु। काकुर्जि-
ह्वा सास्मिन्नुद्यत इति काकुदं। सूर्म्यं सुषिरामिव। तद्यथा। शोभनामूर्मिं सुषिरामग्निरंतः प्रविश्य दहति। एवं ते ×ग्नि २
सप्त सिंधवः सप्त विभक्तयस्ताल्वनुक्षरंति। तेनासि सत्यदेवः सत्यदेवाः स्यामेत्यध्येयं व्याकरणं॥ सुदेवो असि ॥

[illegible] काकुदमिति [illegible] प्रत्ययः [illegible] कंठोष्ठतालु [illegible] सुदेवो असीति। य एम॰
[illegible] तोदेतो [illegible] सत्यदेवो [illegible] स्यार्थः। सिंधवः [illegible] विभक्तयः स्यार्थः।
[illegible] अनुक्षरंतीति। तालुप्राप्य प्रकाशंते इत्यर्थः। सूर्म्यामिति। [illegible]
पर्वरंध्रपर्यायः [illegible] ॥ ॥ ॥

किंपुनरितीति [illegible] प्रयोजनान्वाख्यानस्य [illegible] पुराक-
ल्प [illegible] व्याकरणमधीयते [illegible] प्रयोजनमन्वाख्यायते [illegible] वेदप्रधानमधीयते तेन न
[illegible] व्याकरणाध्ययनस्य प्रयोजनं [illegible] इति [illegible] समाने [illegible] स्यार्थः [illegible]

किंपुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यदपि किंचित्। ओमित्युक्त्वा वृत्तांतशः शमित्येवमा-
दीन्शब्दान्पठंति। पुराकल्प एतदासीत्। संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्र स्थानकरणनादानुप्रदानज्ञेभ्यो स्पश॰ २
वैदिकाः शब्दा उपदिश्यंते। तदद्यत्वे न तथा। वेदमधीत्य त्वरिता वक्तारो भवंति। वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः
अनर्थकं व्याकरणमिति। तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्रमन्वाचष्टे। इमानि प्रयोजनान्यध्ये-
यं व्याकरणमिति। उक्तः शब्दः स्वरूपमप्युक्तं प्रयोजनान्यप्युक्तानि। शब्दानुशासनमिदानीं कर्तव्यं तत्कथं कर्तव्यं। किं शब्दोप-
×प्रा॰दी॰ ५ देशः कर्तव्यः [redacted] अपशब्दोपदेशः आहोस्विदुभयोपदेश इति। अन्यतरोपदेशेन कृतं स्यात्। तद्यथा। भक्ष्यनियमेन

[redacted]

अभक्ष्यप्रतिषेधो गम्यते। पंच पंचनखा भक्ष्या इत्युक्ते गम्यत एतदतोन्येऽभक्ष्या इति। अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः
× ग्रा॰ २ तद्यथा। अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतदारण्यो भक्ष्य इति। एवमिहापि। यदि तावच्छब्दोपदेशः
क्रियते। गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद्गाव्यादयोऽपशब्दा इति। अथाप्यपशब्दोपदेशः क्रियते गाव्यादिषूपदिष्टेषु गम्य-
त एतद्गौरित्येष शब्द इति ॥ ॥
[illegible]

कै॰श॰ किंपुनरिति। उभयोपदेशादुरो द्वौ वापि प्रशस्यो तयोः को ज्यायानित्यर्थः प्रश्ने॥ साधुशब्दप्रयोगाद्धर्माभेरित्यर्थः अथ वोपादेयोपदेशात्साक्षात्प्रतिपत्तिर्भवतीति भावः। हृस्वो ति विग्रहेति प्रतिपदेनाद स्वाश अनन्तप्रातिपादपि तमयमर्थवादः शब्दानामिति शब्दपारायणाशब्दोपाधारूढःशा

किं पुनरत्र ज्यायः। लघुत्वाच्छब्दोपदेशः। लघीयाञ्छब्दोपदेशः। गरीयानपशब्दोपदेशः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा गौ
रित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्यादयोऽपभ्रंशाः। इष्टान्वाख्यानं खल्वपि भवति। अथैतस्मिञ्छब्दोपदेशे सति किं ×८ब२
शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः। गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः। नेत्याह। अन
भ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं
प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम किं पुनरद्यत्वे। यः सर्वथा चि
रं जीवति स वर्षशतं जीवति चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारका
लेनेति। तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः। कथं तर्हीमे शब्दाः
प्रतिपत्तव्याः। किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यं येनाल्पेन यत्नेन महतो महतः शब्दौघान्प्रतिपद्येरन्। किं पुनस्तत्। उत्स ×२प
र्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः। कथंजातीयकः पुनरुत्सर्गः कर्तव्यः। कथंजातीयकोऽपवादः। सामान्येनो
त्सर्गः कर्तव्यः। तद्यथा कर्मण्यण्। तस्य विशेषेणापवादः। तद्यथा आतोऽनुपसर्गे कः॥ ॥ ॥ ॥ ॥ ॥

त्वविशेषस्य। तत्र प्रतिपदोक्तानामिति विशेषणाभिधानं यत्र सम्यग्मातार्थस्यापि शब्दानामित्यस्य प्रयोगः॥ एकदेशे यत्योगादपिलोके उपयुक्त णाः
मित्युच्यते। यथौषधसंस्कृतघृतमात्रेक देशोपयोगे उपयुक्तं घृतमिति व्यवहारः। तथेहलेति प्रतिपाद्यमिति चतुर्भिरिति। आगमकालो ग्रह
णकालः। स्वाध्यायकालोऽभ्यासकालः। प्रवचनकालोऽध्यापनकालः। व्यवहारो यज्ञकर्मादि। किंचिदिति॥ सामान्यविशेषौ यस्मिन्नुत्स
र्गापवादौ विशेषवता कर्मण्यण्। आतोऽनुपसर्गे क इत्यादि॥ ॥ ॥

सकलशास्त्रव्यवस्थैकतानपरस्पराश्रयत्वान्न सिध्यतीति पक्षद्वयाश्रयणं प्रश्नपूर्वकं करोति। किं पुनरिति। आकृतिपक्षे केवलमाश्रीयमाणे नक
र्तेति विप्रतिषेधेनुपपादनोपपद्यते। केवले। विवक्षितव्यक्तिपक्षे पुनः प्रयोगविषयान्नादिशक्तिन प्रवर्तत इति समस्तलक्ष्यसिद्धये कथंचित्प्रदेशे कश्चित्पक्षः परि
गृह्यते। जातिवादिन आहुः। जातिरेव शब्देन प्रतिपाद्यते व्यक्तीनामानन्त्यात्संबन्धग्रहणासंभवात्। सा च जातिः सर्वव्यक्तिषु एकाकारप्रत्ययहेतुः
शब्दादन्या सर्वत्र विद्यते। तत्रापि वाच्यः शब्दाभिन्नद्रव्यसमवेतां जातिमभिदधति। तस्या प्रतीयमानस्य शब्दव्यक्तित्वं प्रतीयते। शुक्लादयः
शब्दा गुणसमवेतां जातिमाचक्षते गुणेषु तु तत्संबन्धात्प्रत्ययः। द्रव्ये संबन्धिसंबन्धात्। संज्ञाशब्दानामप्युत्पत्तिप्रभृत्याविनाशात्पिण्डस्यैकस्य को
मारयौवनाद्यवस्थाभेदेऽपि स एवायमिति अभिन्नप्रत्ययनिमित्ता डित्थत्वादिका जातिर्वाच्या। क्रियास्वपि जातिर्विद्यते सैव धातुवाच्या पठ
तिपठतः पठतीत्यादेरभिन्नस्य प्रत्ययस्य सद्भावात्। द्रव्यपदार्थवादिन आहुः। शब्दस्य व्यक्तिरेवाभिधेया जातेस्तूपलक्षणा

किंपुनराकृतिः पदार्थ आहोस्विद्द्रव्यम्। उभयमित्याह। कथं ज्ञायते। उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा जात्या
ख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्युच्यते। द्रव्यं पदार्थं मत्वा सरूपाणामित्येकशेष आरभ्यते। किं पुनर्नित्यः शब्द आहोस्वित्का
र्यः। संग्रह एतत्प्राधान्येन परीक्षितं नित्यो वा स्यात्कार्यो वेति। तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः। यद्येव नित्यः अथा
पि कार्यः उभयथापि लक्षणं प्रवर्त्यमिति। कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्। सिद्धे शब्दार्थसंबन्धे। सिद्धे शब्दे
अर्थे संबन्धे चेति। अथ सिद्धशब्दस्य कः पदार्थः। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते। यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा सिद्धा द्यौः सिद्धा ए×भा॰कु२
पृथिवी। सिद्धमाकाशमिति॥ ॥

भावेनाश्रयणादानन्त्यादिदोषानवकाशः। किं पुनरिति विप्रतिपत्त्या संशयः। केचित्तु ध्वनिव्यंग्यं वर्णात्म
कं नित्यं शब्दमाहुः। अन्ये वर्णव्यतिरिक्तं पदस्फोटमिच्छन्ति वाक्यस्फोटमपरे संगिरन्ते। अन्ये तु ध्वनिरेव शब्दः स च कार्यस्तत्र जातिरेकैकानित्या
पलंभादिष्यावस्त्वेतं ग्रहणं तथा विशेषे कथं पुनरिति। किमाचार्यैः एवम् सूत्रार्थसंबन्धानामभ्यनुज्ञेति प्रश्नः। सिद्ध इति। तत्र नित्यः
शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा कार्यमप्यादिकालमप्रवाहनित्यतया। अर्थस्यापि जातिलक्षणस्य नित्यत्वं। द्रव्यपक्षेऽपि सर्वे ×पि
शब्दानामसत्त्वे नाधिष्ठापयद्भिन्नं ब्रह्मतत्त्वं वाच्यमिति नित्यत्वं प्रवाहनित्यतया वा। संबन्धस्यापि व्यवहारपरंपरया अनादित्वान्नित्यता। सिद्ध
शब्दस्य नित्यानित्यपोर्दर्शनात्तदर्शोति। नित्येति। नित्यलक्षणस्याप्यर्थस्य पर्यायेण वाचकः। तत्र विग्रहकदाचिदित्यशक्यमाह। कदाचित्सिद्धशब्दस्य
यः कूटस्थेष्विति। अविचालिष्विति। विचालिष्विति। देशान्तरप्राप्तिरहितेषु॥

अथैत१

कै॰ टी॰ ८

ननु चेति सिद्धशब्दः क्रियानिष्पन्नोऽप्यर्थो वा प्राप्यतेऽत्यर्थः संदेहे तावदिति। तत्र हि किं कार्यः शब्दोऽथ सिद्ध इति प्रश्नस्य विचारः कृतः। तत्र कार्यप्रति
पत्तावभिधानं सामर्थ्यात् सिद्धशब्द इति। छिन्ते। तत्समानतन्त्रत्वादिहापि तथैव युक्तमित्यर्थः। अथ यथेति। एवं शब्दप्रयोगे द्विपदमवधारणाद्यो
तकत्वेन एवशब्दस्यापेक्षणात् यदा तु द्योतकमन्तरेणासामर्थ्यात् स्वधातोर्गम्यते तदा तदे [redacted] कपदमित्यवगम्यते। तत्र सर्व एवायोऽभ्युपगम्यते इत्यद्
रुतिः सामर्थ्यात् त्रियममवगमयति। अथ एवेति। इहापि नित्यानित्यव्यतिरेकेणाशंस्यते तदाभावात् सिद्धशब्दो वादात् त्रियमोऽवगम्यते। सिद्ध ए
वेति। कार्याणां तु पदार्थानां प्राक्प्रध्वंसाभावयोः सिद्धत्वात्। स्थितिनते सिद्धा एव। अथ वेति। कथं पुनरेव दलशब्दे संज्ञालेन विनियुक्तेऽस्य

१ सिद्धः सूप॰ १ ननु च भोः कार्येष्वपि वर्तते। तद्यथा सिद्ध ओदनः सिद्धा यवागूरिति। यावता कार्येष्वपि वर्तते तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणं
न पुनः कार्ये यः सिद्धशब्द इति। संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदेव। अथवा सं
त्येकपदान्यप्यवधारणानि। तद्यथा। अब्भक्षो वायुभक्ष इति। अप एव भक्षयति वायुमेव भक्षयतीति गम्यते। एवमिहापि सिद्ध एव न सा
ध्य इति। अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः। अत्यन्तसिद्धः सिद्ध इति। तद्यथा देवदत्तो दत्तः सत्यभामा भामेति। अथवा व्याख्यानतो विशेषप्रतिप
त्तिर्न हि संदेहादलक्षणमिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः। किं पुनरनेन वर्ण्येन किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्य
मिन्नुपादीयमानेऽसंदेहः स्यात्। मंगलार्थं मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मंगलादीनि
मंगलमध्यानि मंगलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ॥ ॥ ॥ ॥

देशः प्रयुज्यते नन्वसौ सत्तावेन विनियुक्त इत्येकदेशात्त्समर्थमाणस्य समुदायस्य वाचकत्वमुपपद्यते प्रतीयमानप्रत्यायकत्वासंभवाद्वार्य एतत्
मानाशे नवाचकत्वात्। एवं तर्हि अनुनिष्पादिनो वयवसमूहाः संज्ञाविनियोगकाले विनियुक्ता एव लोप तत्र वर्णानामसाधुत्वं माभूदित्य व्याख्यायते।
इहापि नित्यानित्ययोर्निर्व्यत्ययाविशेषात् सिद्धश्रुतिरुपात्ताप्रकर्षं गमयति। अत्यन्तसिद्ध इति। व्याख्याद्वारा शब्दादीनां स्थितं नित्यत्वमित्याह। अथवे ८
ति नहि संदेहमात्रादलक्षणता भवति पुनः प्रमाणान्तरेणापि स्थाप्यो व्याख्यानेऽपि नेति। प्रयत्नस्यापाततोऽनेने [redacted] यथैः आगहि ताभिप्रायार्थं सिद्धिर्मं
गलं तत्प्रयोजनमाचार्यो मांगलिकः प्रयतस्यपाध्ययनस्याविच्छेदात्। वीरपुरुषाणीति। श्रोतृणां परेषां प्रणयात्। आयुष्मत्पुरुषाणीति। शा
स्त्रपौनःपुन्येऽर्थमीमांसया राज्यवर्धनात्। सिद्धार्था इति। अध्ययननिष्पत्तिरेव तेषां सिद्धिः ॥ ॥ ॥ ॥ ॥

नावश्यमिति। ततश्चाभीष्टमेव नियमेन शब्दाः प्रयुज्यन्ते। आगोपालांगनं तेषां प्रचारव्याख्यानं स्यात् अविरलप्रयोगाणां विनापि च क्रियापदप्रयोगेण
भेदिनामपरिशिष्टस्य शब्दः प्रयुज्यते यथा आश्वयेमनित्ये। नित्यवीप्स्योरिति। अर्थसंबंधे चेति। द्रव्यपक्षे द्रव्यस्यानित्यत्वादर्थग्रहणं संबंधवि

अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते। किं तर्हि। आभीक्ष्ण्येऽपि वर्तते। तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति। यत्र
वती आभीक्ष्ण्येऽपि वर्तते तत्राप्यनेनैवार्थः स्यात् व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। पश्यति त्वाचार्यो मंगला
र्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति। शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः। अ
थ के पुनः पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबंधे चेति। आकृतिमित्याह। कुत एतत्। आकृतिर्हि नित्या द्रव्यमनित्यम्। अथ द्र
व्ये पदार्थे कथं विग्रहः कर्तव्यः। सिद्धे शब्देऽर्थसंबंधे चेति। नित्यो ह्यर्थवतामर्थैरभिसंबंधः। अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः। सि
द्धे शब्देऽर्थे संबंधे चेति। द्रव्यं हि नित्यम्। आकृतिरनित्या। कथं ज्ञायते। एवं हि दृश्यते लोके। मृत् कयाचिदाकृत्या युक्ता पिण्डो भवति। पिण्डा
कृतिमुपमृद्य घटिकाः क्रियन्ते। घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते। तथा सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति। पिण्डाकृतिमु
पमृद्य रुचकाः क्रियन्ते। रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते। कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः पुन
रपरयाकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति। द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवा
वशिष्यते। आकृतावपि पदार्थ एष विग्रहो न्याय्यः। सिद्धे शब्देऽर्थसंबंधे चेति। ननु चोक्तमाकृतिरनित्येति। नैतदस्ति। नित्याकृतिः। कथम्। न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्था तूपलभ्यते ॥ ॥

शेषणार्थमुपात्तः। अनित्येऽर्थे कथं संबंधस्य नित्यतेति चेत्। योग्यतालक्षणत्वात् संबंधस्य। तस्याश्च शब्दस्वरूपत्वात् शब्दस्य नित्यत्वात् स एव दोषः। द्रव्यं हि
नित्यमिति। असत्कार्यपक्षे ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः। आकृतिरिति। संस्थानं। ब्रह्मदर्शने चागोत्वादि जातेरप्यसत्यत्वादनित्य
त्वात् तैवेदं सर्वमिति श्रुतिविचारात्। न क्वचिदुपरतेति। अनभिव्यक्तेः सर्वेऽर्थे दृष्टतेन लोके व्यवहाराभावात्। व्यवहारे चाकृतेः कारणत्वमर्थ इहे
त्वाभिसन्धे ॥ ॥

नि २

भा॰ ८

अथवेति। अत्र तत्त्वे स्थितत्वतो लोकव्यवहारात्। अथ यतोनन्तातो नित्यत्वं साध्यते। त्रिविधा च नित्यता। तत्र कार्याणि त्यता च आकाशस्य स्फटिकस्य लोहा कृष्णादेश्च स्वरूपतिरोधानेन परस्पर प्रतिभासः। उपधानापगमेन स्वरूपप्रतिभा सा तु पारिणामिकी। उत्पत्ति नाशाभावान्नित्यता। यथा बदरीफलस्य

अथवा नेदमेव नित्यलक्षणं। ध्रुवं कूटस्थमविचाल्य [redacted] नपायोपजननविकार्यनुत्पत्त्यवृद्ध्यव्य योगि यत्तन्नित्यमिति। तदपि नित्यं। यस्मिंस्तत्त्वं न विहन्यते। किं पुनस्तत्त्वं। तस्य भावस्तत्त्वं। आकृता वपि तत्त्वं न विहन्यते। अथवा किं न एतेन इदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थमुपादा य विग्रहः क्रियते सिद्धे शब्देऽर्थे संबंधे चेति ॥ ॥ ॥ ॥ ॥

स्यामतातिरोभावेलोहित्यस्याविर्भावः प्रध्वंसानित्यतासर्वात्मना विनाशः। एतत्त्रिविधानित्यताप्रतिक्षेपेणानित्यतांप्रति पादयितु एम॰
पुरुषं कृत्स्नमित्यादि। ध्रुवंकूटस्थमिति। सुसर्गानित्यतापरिहृता। अविचालीति परिणामानित्यता। अनपायोपजनविकारीति प्रध्वंसानि ८
त्यता। काष्ठेत्यमिति। बुद्धिप्रतिभासः शब्दार्थोपरायराणद्युज्वरितः तदा तदर्थो कालाबुद्धिरुपजापतइतिप्रवाहनित्यता। तदर्थस्य
नित्यत्वमित्यर्थः॥

लोकतइति। अन्यथा कार्येषु वस्तुषु लोकव्यवहारोत्पत्त्यानित्येषु शब्देषु व्यवहारो नादिष्टव्यवहारपरंपरायाः स्त्रिपूर्वकत्वत्तिशब्दा
दीनां नित्यत्वं धारादयस्तस्वार्थं किं पार्थिवभिरुप्यत आनीयन्ते। उपसर्गविनाशप्रकाशेषो पलभ्यन्ते। नैवं शब्दा इत्येतावता नेयों तिः। बुद्धा × वार्थभिर
वक्तुनि इत्येत्यर्थः। अत्र भाष्यकारेणासंभवेतीमध्ये कवाक्यतामनतिश्रित्य वाक्यत्रयं स्थापितं। सिद्धे शब्दार्थसंबंधे शास्त्रं प्रवृत्त
मित्येकं वाक्यं। कथं ज्ञायत इति प्रश्ने लोकतो ज्ञायत इति द्वितीयं। लोकत इत्याह स्माल्लोकतोर्थप्रयुक्तस्यादित्ततीयं। शब्दप्रयोगइ
×सर्थ॰
कथं पुनर्ज्ञायते सिद्धः शब्दोर्थः संबंधश्चेति। लोकतः यल्लोकेर्थमुपादाय शब्दान्प्रयुंजते नैषां निर्वृत्तौ यत्नं कुर्वंति। ये पुनः का
र्याभावाः निर्वृत्तौ तावत्तेषां यत्नः क्रियते। तद्यथा। घटेन कार्यं करिष्यन्कुंभकारकुलं गत्वाह कुरु घटं कार्यमनेन करि
ष्यामीति न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान्प्रयोक्ष्य इति। तावत्येवार्थमुपादाय शब्दा
न्प्रयुंजते। यदि तर्हि लोक एषु प्रमाणं किं शास्त्रेण क्रियते। लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः। लो
कतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते। किमिदं धर्मनियम इति। धर्माय नियमो धर्मनियमः ध
र्मार्थो वा नियमो धर्मनियमः धर्मप्रयोजनो वा नियमो धर्मनियमः ॥ ॥

× प्रयोग॰ तिर्प्रवृत्तोनप्रयोगाद्धर्मो न तु ज्ञानमात्रादित्युक्तं भवति। अर्थेनात्मप्रत्यायनाय प्रयुक्तोर्थप्रयुक्तः। धर्माय नियम इति ॥ चतुर्थ्योता
दर्थ्यं प्रतिपाद्यते। संबंधमात्रेतु षष्ठीविधायसमासः कर्त्तव्यः। चतुर्थी समासस्य प्रकृतिविकारभावएव विधानात्। धर्मार्थ
इति। धर्मार्थत्वान्नियम एव धर्मशब्देनाभिधीयत इति कर्मधारयसमासः। धर्मप्रयोजनइति। निदादिविषयेणानियोगात्। नधर्मेण
प्रयुक्तइत्यर्थः ॥

भा॰के॰ २० प्रियतद्धिता इति। नायमपशब्दः किं तु वैलोकवेदयोर्भवा अवयवास्ते लोकवेदशब्दाभ्यामभिधातुं शक्यन्ते। आधाराधेयकल्पनया
तु तद्धितप्रयोगः। प्रियतद्धितत्वान्निर्दिष्टः यथा कश्चिद्वनस्य तपश्चितिमयुंक्ते कश्चिद्धाम्नस्य तामिति सम्प्रत्ययार्थं। अथ वेति। ना
त्रावयवावयविभावः किं तर्हि वेदलौकिकव्यतिरिक्तः सिद्धान्तशब्दार्थो भवद्रूपतत्त्वार्थः। लौकिकः स्मृतपाणिनिवद्धः वैदिकः। अन्ये पनि

यथा लौकिकवैदिकेषु। प्रियतद्धिता दाक्षिणात्याः यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवै
दिकेष्विति प्रयुञ्जते। अथवा युक्त एवात्र तद्धितार्थः यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लो
के तावत् अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थमु
पादीयते शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुं तत्र नियमः क्रियते इदं भक्ष्यमिदमभ
क्ष्यमिति ॥

चट्र शक्यं चानेनेति। ननु कर्मसामान्ये लिंगसर्वनामनपुंसकप्रयुक्ते कृत्यप्रत्ययः। ततः पदान्तरसंबंधादुपजायमानमपि स्त्रीत्वं बहिरं एम॰
गत्वादन्तरंगं संस्कारं न बाधत इति शक्यं स्त्रीलिंगं। यदा तु पूर्वमेव विवक्षात इति शक्या इति भवत्येव। यदा तु प्रतिघातस्यैव स्तक १०
मांसके क्षुत्प्रतिघातः तदा तु शक्यं प्रतिहन्तुं शब्दस्य मिश्रितभवति ॥ ॥ ॥ ॥

स्वेरादिति। स्वेस्पतीति निर्देशः ग्राम्यः। इष्टिकानामाद्यमर्थ्यं वा स्वे देवः पयोव्रत इति। तत्सामर्थ्यात्तयोः पय एव व्रतयतीति नियमोऽयं न तु विधिः
४ म २

तथा वेदात्स्त्रीपुंप्रवृत्तिर्भवति समानश्च देहविधानो ग्राम्याभ्यां चारण्याभ्यां च तत्र नियमः क्रियते इयं ग्राम्या इयमारण्येति। वेदे ख
ल्वपि पयोव्रतो ब्राह्मणः यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्य इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते श
क्यं चानेन शालिमांसादीन्यपि व्रतयितुं तत्र नियमः क्रियते। तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते। यूप
श्च नाम पश्वनुबंधार्थमुपादीयते। शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबंद्धुं तत्र नियमः क्रिय
ते। तथाग्नौ कपालान्यधिश्रित्याभिमंत्रयते भृगूणामंगिरसां [redacted] तपसा तप्यध्वमिति। अंतरेणापि मंत्र
मग्निर्दहनकर्मा कपालानि संतापयति। तत्र च नियमः क्रियते। एवं क्रियमाणमभ्युदयकारि भवतीति। एवमि
हापि समानायामर्थगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रिय
माणमभ्युदयकारि भवतीति ॥

अर्थित्वाभावे कारणाभावात्। समानायामिति। यद्यपि साक्षादपभ्रंशा नवाचकास्तथापि स्मर्यमाणसाधुशब्दव्यवधानेनार्थं प्रत्या
ययन्तीति केचित्। अपभ्रंशाः परंपरया अनिरूढिमागताः साधुशब्दान् स्मारयन्तः स्वार्थं प्रत्याययन्ति। अन्ये तु मन्यन्ते। साधुशब्दवदपभ्रंशा अ
पि साक्षादर्थस्य वाचका इति ॥ ॥

कै॰टी॰ अस्त्यप्रयुक्त इति। प्रयोगमूलत्वाद्व्याकरणस्मृतेरप्रयुक्तानामनन्वाख्यानात्प्राप्तमाशङ्कते यथा घटादीनां विनाश्यवयवरिक्तिरुपयाति सं
२१ गम्यते नैवं शब्दानां तेहि सर्वदाव्यवहाराद्यप्रयुज्यमाना अपि सन्तः सन्तो नावसीयन्ते इत्याह। इदमिति। कस्त्विदानीमिति। भवज्जातीयकः पुरुषः शास्त्र ×उत्तरं २
दृष्ट्या प्रकृतिप्रत्ययादि संस्कारादनुमितसत्ताः व्यवहारे तु न दृश्यन्त इत्यस्मिन्नर्थे तत्संलोक इति॥ यथा लोकोऽर्थावगमाय शब्दं प्रयुङ्क्ते

अस्त्यप्रयुक्तः। सन्ति वै शब्दा अप्रयुक्ताः। तद्यथा। ऊषतेर चक्र पेचेति। किमतो यत्सन्त्यप्रयुक्ताः। प्रयोगाद्धि भवाञ्छब्दानां साधु
त्वमध्यवस्यति य इदानीमप्रयुक्ता नामी साधवः स्युः। इदं विप्रतिषिद्धं यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति। यदि सन्ति नाप्र
×तावत् २ युक्ताः। अथाप्रयुक्ता न सन्ति। सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम्। प्रयुञ्जान एव खलु भवानाह सन्ति शब्दा अप्रयुक्ता इति। कस्त्वि
दानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्। नैतद्विप्रतिषिद्धम्। सन्तीति तावद् ब्रूमः यदेताञ्छास्त्रविदः शास्त्रे
णानुविदधते। अप्रयुक्ता इति ब्रूमः यल्लोकेऽप्रयुक्ता इति। यदप्युच्यते कस्त्विदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे सा
धुः स्यादिति। न ब्रूमोऽस्माभिरप्रयुक्ता इति। किं तर्हि लोकेऽप्रयुक्ता इति। ननु च भवानप्यभ्यन्तरो लोके। अभ्यन्तरोऽहं लोके न त्वहं लोकः। अ ×के ६
स्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात्। अस्त्यप्रयुक्त इति चेत्तन्न। किं कारणम्। अर्थे शब्दप्रयोगात्। अर्थे शब्दाः प्रयुज्यन्ते। सन्ति चैषां
शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते। अप्रयोगः प्रयोगान्यत्वात्। अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः। कुतः। प्रयोगान्यत्वात्। यदेते
षां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा। ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः। तेरेत्यस्यार्थे क्व यूयं तीर्णाः। चक्रेत्यस्यार्थे कृत
वन्तः। पेचेत्यस्यार्थे क्व यूयं पक्ववन्त इति। अप्रयुक्ते दीर्घसत्त्रवत्। यद्यप्यप्रयुक्ता अवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः। तद्यथा दीर्घ
×कश्यप २ सत्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि च। न चाद्यत्वे कश्चिदपि व्यवहरति। केवलमृषिसम्प्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानु
विदधते॥
नैवमर्थेऽप्रयुक्ता अपि तु सत्स्वपि शब्देष्वर्थः। अर्थे शब्दप्रयोगादिति अर्थे सद्भावः शब्दस्य द्योतयितुं न हि विना शब्देनार्थः [illegible]
र्थप्रत्यायनमुपपद्यते यथा अस्मद्भावे सति प्रतिपत्तिसमानार्थेन भवति परोक्षतायां च प्रयोगे बस्यानवगमात् तथा अपि तत्र्या यत्तत्पदान्तर सन्नि एम॰
नः प्रयुज्यते। प्रत्यय प्रत्ययवाचकमभावेऽपि पूर्वं प्रयुक्तत्वादनुशासनं कर्तव्यमित्याह अप्रयुक्त इति। कृषि संप्रदाय इति। वेदाध्ययनविधिश्च :।

×इतरो यथादिद्रनमाह अप्रयोग इति यतोऽन्ये तेषामर्थानां सन्ति वाचकास्ततो नैषामनुमानमुपपद्यते×२

प्रत्युक्ति
सर्व इति। इदमत्र तात्पर्यम्। यस्य कस्यचिद्वचनादप्रयोगः प्रयोगो न व्यवतिष्ठते अपि तु शिष्टानामेव वचनात्। वाकोवाक्यशब्दे नोक्तिरूपो ग्रन्थ उच्य

सर्वे देशान्तरे। सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते। न चैवोपलभ्यन्ते। उपलब्धौ यत्नः क्रियताम्। महान् हि शब्दस्य प्रयोगविषयः।
सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद ए
कविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। ए
तावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य सन्त्यप्रयुक्ता इति वचनं केवलं साहसमात्रमेव। एतस्मिंश्चातिमहति शब्द
स्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति।
विकार एनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु। गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवना
र्थे प्राच्येषु। दात्रमुदीच्येषु। ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते। क्व। वेदे। त
द्यथा। सप्तास्मै रेवतीरेवदूष। यन्मे नरः श्रुत्यं ब्रह्म चक्र। यत्रा नश्चक्रा जरसं तनूनामिति ॥ ॥ ॥

तद्यथा। किं स्विदावपनं महत्। भूमिरावपनं महदिति। पूर्वं चरितं संकीर्तनमितिहासः। वंशाद्यनुकीर्तनं पुराणम्॥ विकार इति। जीवतो मृतावस्था विकारस्तत्रेत्यर्थः ॥ ॥

भा°
१२ किं पुनरिति। एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति श्रुतिः। तत्र किं सम्यग्ज्ञातः कामधुग्भवति उत प्रयोगात्सम्यग्ज्ञात्वानुष्ठानमित्यर्थः। आहोस्वित्सुप्रयुक्तः कामधुग्भवति सुप्रयुक्तस्तु सम्यग्ज्ञानादित्यर्थ इति प्रश्नः। ज्ञाने धर्म इति चेदिति। यथा ...

किं पुनः शब्दज्ञाने धर्मः आहोस्वित्प्रयोगे। कश्चात्र विशेषः। ज्ञाने धर्म इति चेत्तथाधर्मः। ज्ञाने धर्म इति चेत्तथाधर्मः प्राप्नोति। यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति। यथैव शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसो ह्यपशब्दाः अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा। गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः। आचारे नियमः। आचारे पुनरृषिर्नियमं वेदयते। तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुरिति। अस्तु तर्हि प्रयोगे। प्रयोगे सर्वलोकस्य। यदि प्रयोगे धर्मः सर्वो लोकोऽभ्युदयेन युज्येत। कश्चेदानीं भवतो मत्सरो यदि सर्वो लोकोऽभ्युदयेन युज्येत। न खलु कश्चिन्मत्सरः। प्रयत्नानर्थक्यं तु भवति। फलवता च नाम प्रयत्नेन भवितव्यं न च प्रयत्नः फलाद्व्यतिरेच्यः। ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते। त एव साधीयोऽभ्युदयेन योक्ष्यन्ते। व्यतिरेकोऽपि वै लक्ष्यते। दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणाः। अकृतप्रयत्नाश्च प्रवीणाः। तत्र फलव्यतिरेकोऽपि स्यात्। एवं तर्हि नापि ज्ञान एव धर्मो नापि प्रयोग एव। किं तर्हि। शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन। शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। तत्तुल्यं वेदशब्देन। वेदशब्दा अप्येवमभिवदन्ति। योऽग्निष्टोमेन यजते य उ चैनमेवं वेद। योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद ॥ ×हेलयो हे

फलात्प्रकोपनैर्लेहद्रव्यं हसंग्रायो। तथेहापि प्राप्नमिति भावः। आचार इति। प्रयोगे त्वपि वेद... नच प्रयत्न इति। यदि प्रयत्नं विना फलं स्यात् एप°
प्रयत्नस्यैव वैयर्थ्यमापद्येतेत्यर्थः। तत्तुल्यमिति। वेदः शब्दो [redacted] स्यार्थः स्मृतवेदशब्दार्थस्य यथा ज्ञात्वानुष्ठानं तथा शब्दानामपि प्रकृत्यादि १२
विभागज्ञानपूर्वकप्रयोग इत्यर्थः ॥ ॥

×व्यतिरेक इति पाठः ९

अपर आहेति। वेद... शब्द इति वेदशब्द इति कर्म। तत्पुरुषः। अथवेति॥ अपशब्दज्ञानं नान्तरीयकं शब्दज्ञानस्य पृथक्फलमपशब्दज्ञानस्य ना

अपर आह। तत्तुल्यं वेदशब्देनेति। यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति एवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति। अथवा पुनरस्तु ज्ञान एव धर्म इति। ननु चोक्तं ज्ञाने धर्म इति चेत्तथाधर्म इति। नैष दोषः। शब्दप्रमाणका वयम्। यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह। नापशब्दज्ञानेऽधर्मम्। यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति नाभ्युदयाय। तद्यथा। हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति नाभ्युदयाय। अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। योऽपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं ज्ञाने धर्म इति ब्रुवतोऽर्थादापन्नं भवति अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति॥ ×व्४
×शाद५ अथवा कूपखानकवदेतद्भविष्यति। तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सोऽप्सु संजातासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति। यदप्युच्यते आचारे नियमं वेदयतीति याज्ञे कर्मणि स नियमः। अन्यत्रानियमः। एवं हि श्रूयते। यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः। ते तत्रभवन्तो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते याज्ञे पुनः कर्मणि नापभाषन्ते। तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः ॥ ॥ ॥

लीत्यर्थं गतोक्ष्यति। तत्कालं धर्मफलाभावोऽधर्मफलमुत्पन्नमप्युत्पन्नकल्पं भवतीत्यर्थः। प्रत्यक्षधर्माण इति। योगिप्रत्यक्षेणास्तं वि
दितवन्तः। यद्वान इत्यादि॥ विधाविधाप्रविभागः॥

भा॰के॰ अथेति॥ उक्तमिदं न चान्तरेण व्याकरणमित्यादि। तत्र पदद्वयेऽपि शेषदर्शनात् स्वार्थे व्याकरणस्यार्थे इति। ह्यन्यत्रापि शब्दान्वाख्यानशास्त्रे:
१३ प्रतिपादनाच्छास्तीत्येकाभावः सामान्यविशेषवत्तथा तु द्वयोः [illegible] प्रयोगो नाविरुध्यते यत्र तत्र व्याख्याप्रेक्ष्य देशः सूत्रशब्देनोच्यते तदावश्य
र्थोपपद्यते॥ शब्दापत्तिं परिहरति॥ नहि व्याख्यानरहितसूत्रमात्रश्रवणाच्छब्दाः प्रतीयन्ते। समुदितमिति। समुदायदेशार्थोऽवसायोऽस्या

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः। सूत्रं। सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः। सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते व्याक
करणस्य सूत्रमिति किं हि तदन्यत्सूत्राद्व्याकरणं यस्यादः सूत्रं स्यात्। शब्दाप्रतिपत्तिः। शब्दानां चाप्रतिपत्तिः प्राप्नोति व्याकर
णाच्छब्दान्प्रतिपद्यामहे इति न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते किं तर्हि व्याख्यानतः। ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भव
× चर्चा ४ ति। न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति। किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं
× शब्दः ५ भवति। एवं तर्हि शब्दे ल्युडर्थः। यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते। व्याक्रियन्ते शब्दा अनेनेति व्याकरणं न हि शब्देन किंचि
× तद्धितः ६ द्व्याक्रियते केन तर्हि सूत्रेण। भवे चैव तद्धितो नोपपद्यते व्याकरणे भवो योगो वैयाकरण इति। न हि शब्दे भवो योगः। कृत एवस् × गो ८
× सू॰ ४ त्रे प्रोक्तादयस्तद्धिताः प्रोक्तादयश्च तद्धिता नोपपद्यन्ते। पाणिनिना प्रोक्तं पाणिनीयं। आपिशलं काशकृत्स्नमिति। न हि पाणि
निना शब्दाः प्रोक्ताः किं तर्हि सूत्रं। किमर्थमिदमुभयमुच्यते भवे प्रोक्तादयश्च तद्धिता इति न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धित
श्छोऽटि दीर्घादटि समानपादे हकारे चेति वक्तव्यं। इहापि यथा स्यात्। महाँ हि सः उत्वे च। उत्वे च हकाग्रहणं कर्तव्यं।
अतो रोरप्लुतादप्लुते हशि च। हकारे चेति वक्तव्यम्। इहापि यथा स्यात्। पुरुषो हसति। ब्राह्मणो हसतीति। अ
स्तु तर्हि पूर्वोपदेशः पूर्वोपदेशे किं त्वरसे झलो झल्यूपानि च। यदि पूर्वोपदेशः किं त्वं विधेयं स्निहित्वा स्ने
हित्वा सिद्धिहिवतिसिह्नेहिपतिरलो व्युपधाद्धलादेः शिति किं त्वं न प्राप्नोति क्त्वाविधि क्तश्च विधेयः अधुक्ष
त अलिक्षत। भलरगुपधादनिटः क्सः इति क्सो न प्राप्नोति रुदविधिः रुदविधेयः। रुदिहि स्वपिहि। वलादिलक्षण
इण्न प्राप्नोति झल्यूहणानि च किं अहकारानीति। तत्र को दोषः अल्लोपलोपी तीह न स्यात्। अरान्धां अरा
धां तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च। यदि चाकिं विदस्य परोपदेशे प्रयोजनमस्ति तत्रापुपदेशः कर्तव्यः ॥

चारितमेतत्। अत्रार्थे मायिवक्तव्यं भो हसतीति रोर्थत्वार्थो। यदि किंचिदिति। प्रयोजनार्थो द्विवर्णानामुपदेशोऽनस्वरूपप्रतिप
त्त्यर्थः ॥

भाक्तैः
२९

रमितिउभयत्रापिप्रयोजनमङ्गावात्प्रः स्वर्नयती।तिताकारोऽप्राप्नोतिनत्रत्रस्वर्णोग्रहणामित्ति।भद्रङ्कर इति।।द्विर्वचने कृतेचत अ० १ पा० १
स्यामिद्धत्वाद्रोरीतिरेफलोपोनास्तिहलोपमामिति लोपकृत्यमिकरतिपत्तेरेफद्वपश्रवणाप्रसंगा।कुंडं रथेनेति। अनुनासिकेनेवप
रसवर्णोऽभ्यामिति नियमाभावाद्रेफः प्राप्नोति। तस्यवासिद्धत्वाद्रोरीतिरेफलोपोनास्ति।रेफोपमाामिति।।अनुनासिकपरसवर्णोद्वि
धानेहि स्थानेंऽतरतमपरिभा[redacted]षोपस्थानाद्दोषाभावः।नहिरेफस्यसाकारोंतरतमः।नाप्यनुस्वारस्योक्तः।मोरस्वावेति।हकारस ने
व रदोविचार्यते।अयंरेफोपकारकोऽशाभ्यांपूर्वं स्योपदिश्यतेहरपवहितिपरएकवापध्यान्मा सामिति।कस्मात्र विशेषः रेफस्यपरोपदेशो
नुनासिकद्विर्वचनपरसवर्णाप्रतिषेधः।रेफस्यपरोपदेशे अनुनासिकद्विर्वचनपरसवर्णानांप्रतिषेधोवक्तव्यः।अनुनासिकस्यस्वर्णेय
तिप्रासनेयती।तिप्यरोठनासिकोनुनासिकोवेत्यनुनासिकः प्राप्नोति।द्विर्वचनस्यभद्रङ्करोभद्रंङ्कर इतिद्विर्वचनंप्राप्नोति।परसव ह
र्णस्याकुंडंरथेनवनेरथेन अनुस्वारस्ययपीतिपरसवर्णःप्राप्नोति।अस्तुतर्हिपूर्वोपदेशः पूर्वोपदेशेकिंस्वप्रतिषेधोऽच्लो
पवचनेच।यदिपूर्वोपदेशः किंत्वंप्रतिषेधोदेवित्वादिदेविवतिरलोऽन्त्युपधायारितिकिं संप्राप्नोतिनेवदोषः नैवंविज्ञायतेऽलो
ऽन्त्युपधायारितिकिंतर्हिरलः अन्त्युपधायारितिकिमिरमन्त्युपधारिति अचकारांतात्तन्त्युपधायारितिअच्लोपवचनंच।व्योश्चलोपोवृ
क्त्याःऔधेरःपचेरन्यजेरन्दीवेरस्यानुकूऌजीरदानुः[redacted]वलीतिलोपोनप्राप्नोति
।नैषदोषःरेफोप्यत्रनिर्दिश्यते।लोपोव्योर्वलीतिरेफेचवालिचेति।अथवापुनरस्तुपरोपदेशः ननुचोक्तं रेफस्यपरोपदेशेअनुना
सिकद्विर्वचनपरसवर्णप्रतिषेधइति।अनुनासिकपरसवर्णानांपरस्तावत्प्रतिषेधोनवक्तव्यःरेफोष्मणांसवर्णानसंतिद्विर्वचनेपि =
नैषोरहोकार्थिणोद्विर्वचनस्यकिंतर्हि।निमित्तमिमौरहौद्विर्वचनस्यातस्ययथाहस्ताभोज्यंतोमाठरकौंडिन्यौपरिवेविषाणतिनेदा
द्रेफोपिनकार्यिपर्यःतेऽनेकवाक्यतायांसामान्यविशेषविधौ।त्रीकृष्यवहारादेवशहार्थसंबंधपरिज्ञानंवतप्रोस्यवि भीतोभुंजाते ॥ ॥ एका०
धेविशेषविधिर्बाधकःप्रत्यासत्त्याविशेषविधिःसामान्यविधिस्त्वनुमेयइति रेफस्यकार्यित्वंनि।भिन्नत्वेनबाध्यतेस्पष्ट दकारोतस्यानिर्लेनानि
भिन्नत्वमितिकःतस्मादिस्फुरस्यात्परोपकारबाध्यतेलस्पष्टत्वपेक्षणाद्वाध्यबाधकभावेनकाचिद्देशलानास्तियथाविचीषशीतिदीर्घत्वादि
भा २

१ [redacted]मेति।यिघानादेषांसाफल्यस्यातप्रत्याहारप्रतिबद्धंतकार्यत्नुप्राप्नोति।केपुनरिति।न■स्वरूपग्रहः कथमिति।।प्रकृतिनिमित्तप्रयत्रः अ
पुरुषास्त्यस्येवहेतुकथनं अनुपदिष्टाश्चेति।।अपुरुषाःप्रत्याहारेलस्याणेनपाठाभावादसंवहाद्युत्यर्थःउपदेशोद्विविधःपाठोग्रहणाकशास्त्रे
णाप्रत्यापनंच।सद्विविधोप्येषांनास्तीत्यर्थः चरु शोहे तोपतोनुपदिष्टास्ततोऽपुरुषात्यर्थःकचित्सवशहीनप्यते।।शर्षीति।।शर्पपादे
फल्त्वमिति फलोत्र शफशीतित्र सूक्ष्मविध्यति।।अपधमानीयादेरिति।। यदिद्विर्वचनेपूर्वेत्रासिद्धमसिद्धं अथापिपूर्वत्रासिद्धीयमद्विर्वचनइतिनि
इदंविचार्यते।।इमेऽयोगवाहानकचिदुपदिश्यंते।श्रूयंतेच तेषांकार्यार्थउपदेशःकर्तव्यः केपुनरयोगवाहाः।विसर्जनीय
जिह्वामूलीयोपध्मानीयानुस्वारानुनासिक्ययमाः कथंपुनरयोगवाहाः यदयुक्तावहंति। अनुपदिष्टाश्चश्रूयंते।कपुनरेषामु
पदेशःकर्तव्यः अयोगवाहानाम हुत्वं अयोगवाहानामट्सूपदेशः कर्तव्यःकिंप्रयोजनं गात्वं उरःकेणउरःपेण [redacted]
स[redacted]अउअवाय इति णत्वं सिद्धं भवति।शर्षुजश्भावषत्वे।शर्षूपदेशःकर्तव्यःकिंप्रयोजनं जश्भावषत्वे। अय मुद्धिन्नरूपध्मा
नीयोपधःपद्यते।तस्यतश्त्रूकृतेउब्जिताउब्जितुमित्येतद्रूपंयथास्यात्।पद्युपध्मानीयोपधःपद्यते।उब्जितिषतीस्वपध्मानी
पादेरेवद्विर्वचनंप्राप्नोतिदकारोपधेपुनर्न्द्राःसंयोगादयइतिप्रतिषेधःसिद्धोभवतीतियदिदकारोपधःपद्यतेकारूपसिद्धिः
उब्जिताउब्जितुमिति।भ्राष्ट्रैभउब्जेःइदमस्तिलोप्युनाश्चरितितलोपस्यासिद्धत्वाज्ञस्यनासन्निपातेभोभवतीति तत्राद्विर्वक्तव्यं
नवक्तव्यंनिपातनास्वासिद्धं किन्निपातनंभुजन्युब्जौपाण्युपतापयोरितिरहापितर्हि प्राप्नोति।अभ्युद्गः समुद्गइति अकुत्वावि
षयेनिपातनं।अथवानैतदुब्जेरूपंगमेरेतद्गुपसर्गाड्डोविधीयते।अभ्युद्गः समुद्गः इति ॥
ति इंसर्वयोविद्धिगतीतिप्राप्नोतिमिथ्यात्तनपदोद्विर्वचनेकथंनिपातनाहाकाशेषोनुमीयतेआसिद्धप्रकरणात्तोऽफलाङ्कुरित्यत्रोब्जेर्भशतितत्रनं
ग्रावतिरकारस्याद्विर्वचननिषेधः कर्तव्यो नतुद्विर्वचनामितिपूर्वत्रासिद्धीयमद्विर्वचनइत्यस्याप्रवृत्त्याप्रवृत्त्याभित्वसिद्धत्वादिष्टद्विर्वचनसिद्धिःअ
थ्याफिनवाकाशोनानुमानंनिपातनमेवप्रतिपादकं।तथापिदकारोपदेशसामर्थ्यात्द्विर्वचनेकृतेदकारस्यत्वप्रवर्तते। अकुत्वविषय
इति।।विशिष्टविषयमनुमानमित्यर्थः।।

भाकी ३० अवग्रहमिति॥ अनुस्वारस्य शर्षु तत्सवर्णत्वाभावेन लोपसिद्धेर्ग्रहणं नियमार्थं। तुमोत्यो। तस्मात्तत्रैव प्रयत्नात्। अल्पप्रयत्नभूत पुंस्विति अ० १ पा० १
विशेषेणेति। प्रयोक्तव्यविशेषमनपेक्ष्य सकलप्रयोक्तॄनुद्देशेन प्रवृत्तत्वाद्देशप्रयोक्तृत्वसिद्धिस्तत्र तत्रोपदेशः कार्य इत्यर्थं उक्तमिति।

यत्नं प्रयोक्तुमसमर्थस्तु धनुःपुंस इत्यत्र घ्राणमिति यत्नेऽसिद्धं भवति। नु विसर्जनीयश्चर्व्यवाये पीति विसर्जनीयग्रहणात्तत्कार्यं भवति। नुमप्राप्तिस्त्रिह्रस्वग्रहणं तत्कार्यं। कथं सर्पिष्षु धनुष्षु। अनुस्वारे कृते शर्व्यवायस्ये नुमि इह। अवग्रहानुमोग्रहणात्कृतेऽयं
अनुस्वारविशेषणार्थं नुम्ग्रहणं नुमो योऽनुस्वारस्तत्र प्रयासीत्तदिह माभूत् पुंस्विति अथवा अविशेषेणोपदेशः कर्तव्यः किं प्रयो-
क्तव्ये। अविशेषेणोपदेशो नाम असंयोगास्तं लोपस्य द्विर्वचनस्थानिवद्भावप्रतिषेधात् अविशेषेणासंयोगसंयोगप्रयोक्तृत्वे जश्त्वं द्वित्वं
हलोऽनन्तराः संयोग इति संयोगसंज्ञा संयोगे गुरु इति गुरुसंज्ञा गुरोरिति प्लुतो भवति। उपधासंज्ञा च प्रयोक्तव्ये दुष्कृतं निष्कृतं निष्पी- दुष्पीतं
दु तं दुष्पधस्य चाप्रत्ययस्येति षत्वं सिद्धं भवति। नैतदस्ति प्रयोक्तव्ये नाडुपधग्रहणे न विसर्जनीये विशेष्यते किं तर्हि सकारो विशेष्यते इडुपधस्य सकारस्य योऽपि विसर्जनीयः। इति अप्रत्ययस्य आप्रत्ययस्येत्युच्यते॥ इडुदुपधं विसर्जनीयेऽपि जिह्वा- द्रो
मूलीयोपध्मानीयौ विसर्जनीयस्येति। अलोऽन्त्यविधिश्च प्रयोक्तव्ये तत्रानन्तरस्येति। अलोऽन्त्यस्य विधयो भवन्तीत्यलोऽन्त्यस्य सत्त्वं सिद्धं भवति। तदपि नास्ति प्रयोक्तव्ये तिष्ठत्यनात्स्थानवर्तितो विसर्जनीयस्यैव भविष्यति। द्विर्वचनं प्रयोक्तव्ये गुरुकुरुष्व अनविचत्र चक्षुरस्याप्येष प्रयत्नः द्विर्वचनं सिद्धं भवति। स्थानिवद्भावप्रतिषेधश्च प्रयोक्तव्ये यथेह भ-
वति उरः केशाद्वरपोणा यत्र्यवायश्चेति शालीस्त्वभिहापि स्थानिवद्भावात्प्राप्नोति। प्लुतो एके नमहोरस्केने। तत्र नान्तरीयधा
विनिपातिषेधः सिद्धो भवति॥

यथाऽनीयत्वाच्चोक्तत्वे संयोगसंज्ञायां तस्मात्सिद्धत्वात् संयोगाभावाद्गुरुत्वाभावात्प्लुतो न स्यात्। महोरस्केनेति। पूर्वत्रासिद्धेन स्थानिवद्भावस्य विधिषेधः अच परस्मिन्नित्यवर्णाविधौ विदत्यस्यत्रालोपस्थानिवद्भावादेश इत्यसु॥ णमा० ३०

अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्

इदानीमन्यद् विचार्यते अर्थवत्ता विचार्यते॥ किं पुनरिति। पदद्वये प्रतिवर्णं विभज्य तत्स्थानिज्ञानं विचारस्य प्रयोजनं। वर्णव्यत्यय इति॥ एक-
स्य वर्णस्यापगमे अन्यस्योपगमो व्यत्ययः। सककारस्येति। तस्यैवान्वयव्यतिरेकाभ्यामवधार्यते अर्थो वस्तुत इति भावः। वर्णानुपल- ब्धौ चेति। ध्यो

किं पुनरिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः। अर्थवन्तो वर्णाः। कुतः। धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णाना-
मर्थदर्शनात्। धातव एकवर्णा अर्थवन्तो दृश्यन्ते॥ एति अध्येति अधीते। प्रातिपदिकान्येकवर्णान्यर्थवन्ति। आभ्याम्
एभिः एषु। प्रत्यया एकवर्णा अर्थवन्तः। औपगवः कापटवः। निपाता एकवर्णा अर्थवन्तः। अ अपेहि। इ इन्द्रं पश्य। उ उत्तिष्ठ। अत्र
पश्यामः धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे अर्थवन्तो वर्णा इति॥ वर्णव्यत्यये चार्था-
न्तरगमनात्। वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहे अर्थवन्तो वर्णा इति। कूपः सूपो यूप इति। कूप इति ककारेण कश्चिदर्थो
गम्यते सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते यूप इति सकारापाये यकारोपजने चार्थान्तरं गम्यते
ते मन्यामहे यः कूपे कूपार्थः स ककारस्य॥ यः सूपे सूपार्थः स सकारस्य। यो यूपे यूपार्थः स यकारस्येति। वर्णानुपलब्धौ
चानर्थगतेः वर्णानुपलब्धौ चानर्थगतेर्मन्यामहे अर्थवन्तो वर्णा इति॥ वृक्षः ऋक्षः काण्डीरः आण्डीरः। वृक्ष इति सव-
कारेण कश्चिदर्थो गम्यते ऋक्ष इति वकारापाये सोऽर्थो न गम्यते काण्डीर इति सककारेण कश्चिदर्थो गम्यते आण्डीर
इति ककारापाये सोऽर्थो न गम्यते। किं तर्हि उच्यते अनर्थगतेरिति॥ न साधीयो ह्यर्थस्य गतिर्भवति॥ ॥ ॥

अर्थो तावत्सामान्यप्रकृतोऽर्थो न गम्यत इति विवक्षितं इत्यर्थस्वरूपावगत्यभावमात्रमनेनोक्तमिति मत्वाऽऽह किं तर्हि उच्यत इति न
साधीय इति॥ यावता केनचित्प्रकर्षेणाऽऽरोप्यते यथा न किंचिदयं न करोतीत्युक्ते कश्चिदाह सुतरामयं करोतीति॥ ॥

भा॰कै॰ एवंतर्हीति। प्रकृतोर्थोनाश्यते। अर्थोतरं तु गम्यत इत्यर्थः। तस्यार्थ इति। वर्ण्यस्य। यदंत्रानिवर्णानामर्थवत्त्वमस्ति भूमिति कथंत अ॰१ पा॰१
३१ प्रातिपदिकं। यथा स्यादित्याह। सोर्थ इति। प्रकृतो र्थः उच्चरितेति। गतार्थता दृश्यते। एकाकृतीयस्यमुदायस्य नोपो। अथापि
तेषु अरहितदृश्यते समुदायस्य एकोर्थ ग्रहः। न च प्राणी प्राणं न समुदायं भवति। विशेषणं वयवं दृश्यते समुदायस्य विशेषेण
एवंतर्हीदं पठितं व्यपात वर्णानुपलब्धोवात रथो गतेति। किमिदमतदर्थं गतेरिति। तस्यार्थस्तदर्थः तदर्थस्य गतिः तदर्थगतिः न
तदर्थगतिः अतदर्थगतिः अतदर्थगतेरिति। अथवा सोर्थस्तदर्थस्य गतिः तदर्थगतिः न तदर्थगतिः अतदर्थगतिः [redacted] × तदर्थः२
[redacted] अतदर्थगतेरिति। निमित्तार्थे तथा निर्देशः। कर्तृस्थः नकमः उत्तरपदलोपो द्रष्टव्यः। तद्यथा उष्ट्रमुखमिव मुखम
स्य उष्ट्रमुखः खरमुखः एवमतदर्थगतेरन्यतराया इति। संघातार्थवत्त्वाच्च। संघातार्थवत्त्वात् समन्यामहे अर्थवंतो वर्णा इति येषां
संघाताः [redacted] अर्थवंतः अवयवा अपि तेषामर्थवंतः। येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। तद्यथा एक
२ श्चक्षुष्मान् दर्शने समर्थः। तत्समुदायश्च शतमपि समर्थं चक्षुष्मतां। तैलं नाने समर्थं। तत्समुदायश्च खार्यपि समर्था। येषां पुन
रवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। तद्यथा एकोंधो दर्शने असमर्थः। तत्समुदायश्च शतमप्यसमर्थं। एकश्च सि
कतातैलदाने असमर्था तत्समुदायश्च खारीशतमप्यसमर्थं। यदि तर्हीमे वर्णा अर्थवंतः अर्थवत्कृतानि प्राप्नुवंति कानि अर्थ[redacted] ताच्छि
अर्थवत्कृतानि वत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा प्राप्नोति धनं वनमिति। धनादिभ्यः प्रातिपदिकेभ्यः स्वाद्युत्पत्तिः प्राप्नोति पदसंज्ञा तत्र नलोपादीनि
प्राप्नुवंतीति धनं वनमिति ॥
एवमिहाप्यनर्थानामपि प्रत्यर्थशब्देन प्रकृतोर्थ उच्यते नार्थमात्रमित्यर्थः नलोपादीनीति। अत्रापि तु
विभक्तेर्न भवति यतोपदेशोत्तरपदादी प्रातिपदिकसंज्ञा प्रवर्तते तदेव समुदायस्यापि वर्तते तदंतं न तु लादिभक्ते तत्कार्याभावे तदपि समासस्य यथ
हलोन च तुल्यजातीयस्यानुवृत्तावयवसमुदायस्य प्रातिपदिकसंज्ञानिवर्तते तेनार्थवत्समुदायमात्राश्रये नैव चार्थेन समुदायार्थं वर्तते ३१
नैव तस्य वयवा समर्थाः विभक्त्युत्पत्ति वर्धते ॥ ॥ ॥

अत्र परिहारमाह॥ संघातस्येति। एकत्वार्थं कत्वे विभक्त्यर्थः तच्चैकमित्येकेन विभक्तिरुत्पद्यते यथा बहवो दृष्टाः एकेनैव प्रदीपेन दृश्यम
र्थं पश्यंतीति। साक्षोत्पद्यमानासमुदाया देवतंत्रे गासर्वानुग्राह्य इत्युत्पद्यते सखदायद्विवचनं तत्पदसंज्ञा समुदायस्यैव भवति न प्रत्ये
या २
संघातस्यैकार्थात् सुबभावो वर्णात्॥ संघातस्यैकत्वमर्थः तेन वर्णात्सु उत्पत्तिर्न भविष्यति। अनर्थकास्तु। प्रतिवर्णमर्थानु
पलब्धेः अनर्थकास्तु वर्णाः कुतः। प्रतिवर्णमर्थानुपलब्धेः नहि प्रतिवर्णमर्था उपलभ्यते। किमिदं प्रतिवर्णमिति वर्णं व
वर्ण र्णं प्रति प्रतिवर्णं व्यत्ययापायोपजनविकारेष्वर्थदर्शनात्। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहे
अनर्थका वर्णा इति। वर्णव्यत्यये कृतेस्तर्कः कसेः सिकता हिंसेः सिंहः। वर्णव्यत्ययो नार्थव्यत्ययः। अपायो लोपः घ्न
ंति घ्नंतु अघ्नन् वर्णापायो नार्थापायः। उपजन आगमः। लविता लवितुं लवितव्यं वर्णोपजनो नार्थोपजनः। विका
रः आदेशः घातयति घातकः वर्णविकारो नार्थविकारः यथैव वर्णव्यत्ययापायोपजनविकारा भवंति तद्व
दर्थव्यत्ययापायोपजनविकारैर्भवितव्यं। न चेह तद्वत्ततो मन्यामहे अनर्थका वर्णा इति ॥ ॥ ॥ ॥

कंपस्मात्प्रत्ययविधिरित्युक्तवर्जनाद् गुणंतत्वात् अनर्थका इति॥ धात्वादिव्यतिरिक्ता वर्णाः प्रतीक्रियंते। अन्यथा शास्त्रविरोधः
प्राप्नोति॥ किंमिदमिति॥ असमासशंकया प्रश्नः समासेनत्र तेनैव वीप्सा घोतितेति द्विर्वचनं न भवति। वर्णव्यत्यय इति प्रदु
क्तं वर्णव्यत्यये अर्थांतरगमतादुर्गोपलब्धौ चानर्थ्यादिति तस्यानेकांतिकत्वमुद्भाव्यते ॥ ॥ ॥ ॥

पा०कै० ३२ उभयमित्याहेति। यत्रान्वयव्यतिरेकाभ्यामर्थवत्ताशक्यते कल्पयितुं तत्रैवास्य उपात्तं तथा न सर्वत्रेत्यर्थः। संघातं नातमिति। तद् अ० १ पा० १

उभयथापिदं वर्णोपलब्धं अर्थवन्तो अनर्थका इति वाकि मत्र न्याय्यं उभयथापि स्यादिह कुतः स्वभावतः तद्यथा समानमीहमानानां चा धीयानानां च केचिदर्थैर्युज्यन्ते अपरे न न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति

सर्वैर नर्थकैः। तत्र किमस्माभिः शक्यं कर्तुं यद् धातुप्रत्ययप्रातिपदिकनिपाताः एकवर्णा अर्थवन्तः अतोन्ये नर्थकाः

इति भाष्याभाविक मेतत्। कथं य एवम वताव तानामर्थवत्तायां हेतुरुपदिष्टः अर्थवन्तो वर्णा धातु प्रातिपदिक प्रत्य

यनिपातानामेकवर्णानामर्थदर्शनादिति अन्यस्य वार्थान्तरगमनादृष्टानुपलब्धौ वानर्थगतेः संघातार्थवत्त्वाच्चेति।

संघातान्त राणां वैतान्येवं उदाहरणानि अर्थान्तरेषु वर्तेते कूपः सूपो यूप इति [redacted] यदि हि वर्णास्य प्रकृतमर्थां

तरगमनं स्यात् भूयिष्ठः कूपार्थः स्यात् स्यात् यत् यार्थः कूपे कूपार्थः यूपे यूपार्थः कूपे सूपार्थः सूपे यूपार्थः

बैतानिए ५ तत्त्वे यत् एतच्चानकाश्रितः कूपस्य वा सूपे [redacted] स्य वा कूपे कूपस्य वा सूपे यूपस्य वा कूपे सूपस्य वा यूपे

वासूपे अतो मन्यामहे संघातान्तराणि अर्थान्तराणि यकारस्य सकारादिष्वर्थेन इति। इदं स्वल्वपि भवता वर्णानामर्थवत्त्वं

वताप्याधीयते नर्थकत्वं योतितं। यो हि मन्यते यः कूपे कूपार्थः स ककारस्य यः सूपे सूपार्थः स सकारस्य यो यूपे यूपा

र्थः स यकारस्येति उपपद्यते स्तस्य नर्थकत्वं स्यात्। तत्र यस्मार्थ निरूहतेसंघातार्थवत्त्वाच्चेति एतस्यापि प्रातिपदिकसंज्ञा

याः परिहारं वक्ष्यति ॥ ॥ त्व०

क्रांत कूपसूपयूपानामन्वयो व्यतिरेको वा विद्यते। अतो यो वा वर्णान्तरावृत्तिर्भवति तस्यैवार्थवत्त्वमिति। एतस्यापीत्यर्थः इत्यत्रापि संघातानर्थक्यमेव तोर्थ ३२

भावः स्वरांगवत्त्वं च वेति ॥ ॥

आचार्यादिति। आचार्यो व्यवहारः तद्विषयविकल्पेनैव च तन्त्रकार्याप्रधानत्वादिति प्रधानाप्रधानसंनिधौ प्रधानमेव कार्याणां प्रयोजकमि

ति यत्रार्थानामनुबन्धानामसंज्ञा न प्रवर्तेत इत्यर्थः शेते इति। शीलेन वा शेली स प्रधानपूर्विकाप्रवृत्तिः यथा लोके ब्राह्मणैः सह ब्राह्मण

भोजयन्ते ततः सह गतिर्यातिति स्वमिह। पि वर्णा आचार्यैर्लानि हि वात्यर्थः लोपश्चेति प्रत्याशिक्ष्यत्वाद् आदिरन्त्येन सहेतेत्यने

नात्संज्ञाविधानकाले अनुबन्धानां लोपात्स निधानादनुत्सानप्रवर्तेते अनुबन्धाः एकवाराणव सेति। इत्संज्ञा प्रति वहेच कार्यम संतर

अइउण् ऋऌक् एओङ् ऐऔच्। प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ग्रहणम् एते अस्त्वप्रत्याहारार्था अनुबन्धाः क्रियन्ते एतेषामज्ग्र

हणेन ग्रहणं किं स्यात्। किं च स्यात्। दधि णकारीयति मधु णकारीयतीति इको यणचीति यणादेशः प्रसज्येत आचार्य

प्रवृत्तिर्ज्ञापयति नानुबन्धानामज्ग्रहणेषु ग्रहणं भवतीति यदयं अचः परस्मिन्पूर्वविधाविति स्थानिवद्भावं करोति नैव दोषो न प्रयोजनम्

तत्के मिहआचारादिति आचार्याणामुपचारात्। नैते आचार्या अनुकार्या अकृतसर्वतः अप्रधानत्वात् अप्रधानत्वाच्चनरव त्यचातीयानन्त

त्वप्येतेषामस्तु प्राधान्येनोपदेश इक्रियते एतद्विहितस्त्वकुलए तत्। एवाद्याचार्यस्यैषी लीलास्मतेयत्तुर्संज्ञातीये पूर्वविज्ञाति।

त्वप्येतेषामस्तु प्राधान्येनोपदेशे इक्रियते एताहितस्त्वकुतएतत्। एवाद्याचार्यस्यैषी लीला स्मृतेपतदुर्संज्ञाती येपूर्वविज्ञाति।

ल्वप्येतेषामस्तु प्राधान्येनोपदेशेक्रियते लोपः खल्वपि ताप्रवतिकाकालोऽजितिवा प्रोक्तः तत्कालानां यथा भवेत्। अचीग्र

व अचः अस्तु सल्लोरत्सु लोपश्चवलझ्रा लोपः खल्वपि तावद्भवति ऊकालोऽजितिवा युक्तः ऊकालोच् उऊऊ इत्येवं कालोऽभवतितत्तो दूरस्वदीर्घ

दृष्टान्तवा यैसे नैर्वानभविष्यति अथवा योगविभागः करिष्यते ऊकालोच् उऊऊ इत्येवं कालोऽभवति ततो ह्रस्वदीर्घ

प्लुतसंज्ञश्च भवति ऊकालोऽच् एवमपि कुक्कुटस्य त्रयादिप्राप्नोति। तस्मात्त्वेवांज्ञ एव परिहारः एषएवार्थः अपर आह हृ

स्वादीनांवचनात्प्रणाधावेदेव यो तो स्तु अकार्याणि यथास्युः तत्काले अस्तु कार्याणि ॥ ॥ ॥

च प्रतिपादयन्तिसत्तत्कथं किं विकार्यं प्रतिपद्यते। उकालोऽजिति। सिद्धेऽभ्युपेत्य विभागेन कालविशेषार्थत्वमित्यन्ताभ्युपगमेनेति ततोऽनुबन्धाना

वाट्स्त्रा मा मूकाल्नवाभावानप मपीति कल्पनाकृतेहयदेवांमात्रिकस्यात्प्रपन्नस्यते। त्र्यर्थवय्यवयपरिहारो स्थिहाचौ तो के कारौ न चवर्णाद्ये नैका ॥ ॥ ॥ ॥

ज्ञोतिवर्ग्यस्यतरतितयापिपूर्वमेवमात्राकालोऽचगम्यते न च मात्रिकं व्यंजनमस्तीत्यकल्व्यात्पुनरिहनोक्तः

भा॰कै॰ ३३ अथकिमर्थमिति। अनुदित्सवर्णस्येतिकस्मान्नकृतमिति प्रश्नः। एणग्रहणेनग्रहणार्थेस्वेतसञ्ज्ञानामग्रावस्यकर्तव्यउपदेशःगौर्विस्यादेषदृ अ॰१पा॰१
अथकिमर्थमंतस्थानाम णासूपदेशक्रियतेइहसय्यंतासंवत्सरः यल्लोकंतल्लोकमितिपरसवर्णस्यासिद्धत्वादनुस्वारस्यैव। द्विर्वचने
तत्रपरस्यपरसवर्णोकृतेतस्यचग्रहणेनग्रहणासूर्वसापिपरसवर्णोयथास्यात्। नैतदस्तिप्रयोजनं। अस्त्यत्र। द्विर्वचनेपरसवर्णे
त्वासिद्धंवक्तव्यमितियावतासिद्धत्वानुस्वारस्यपरसवर्णएवतादृवतिपरसवर्णेनहिकृतेतस्यग्रहणेनग्रहणात् द्विर्वचनंयथास्यात्।
माभूद्द्विर्वचनंननुचभेदोभवति। सतिद्विर्वचनेत्रियकारं असतिद्विर्वचने द्वियकारं नाप्तिभेदः सत्यपिद्विर्वचने द्वियकारमेवकथं
हलोयमांयमिलोपइत्येवमेकस्यलोपेनभवितव्यं। एवमपिभेदः सतिद्विर्वचने कदाचिद्द्वियकारं कदाचित्त्रियकारं असतिद्विय
कारमेवसएवकथंभेदोनस्यात्यदिनित्योलोपःस्यात्। विभाषासलोपःयथाभेदस्तथाऽस्तुवर्तितेविभाषाग्रहणेविपहार
पस्ययोर्दूरेयश्चरोदीतिद्विर्भावंतुवेधशास्तिलग्रहणपरस्यास्य अनुवर्ततेविभाषेतिकथंज्ञापकोऽनिसोदीर्घत्वम
वेग्रतिषेधार्थोनकाशिस्यात् यदिनित्योलोपः स्यात्पतिषेधवचनमर्थकंस्यात्। अस्त्वत्रद्विर्वचनंसयोःसरित्सवर्णेतिलोपो
भविष्यति। पश्यतित्वाचार्यःविभाषालोपइति ततो द्विर्वचनमातेषेधंशास्तिनेतदस्तिज्ञापकंनित्येऽपि सत्यलोपेसर्पादिषेधो
वक्तव्यःवज्ञःपदेतदर्थोऽनेकंमितिद्विर्वचनलोपापवादःसन्निज्ञापतेकथंपरस्रक्वकृतेएतावेतदुपरसद्रुरणोवायमोवा
यस्त्रिात्रलोपःस्यात्द्विर्वचनमनर्थकंस्यात्किंतर्हितयोर्याणोरुदपरस्रायदकृतेद्विर्वचनेत्रिव्यंजनःसंयोगःप्रत्यवशं
स्यः इहेदानींकर्तव्यंइतिद्विर्वचनसामर्थ्यात्लोपोनभवतिएवमपिहापिलोवोनस्मात्कथंनिवर्तितमितसमा। क्षेप्यापिलोपोवक्तव्य
समानिषेधोवक्तव्यः नदेतदस्यंतसंविधमात्वात्विभाषानुवर्ततेतनवेति ॥ ॥ ॥ ॥ ॥
लोपयथास्यादिति। ननुचभेदइति। अकृतेतोस्त्येवभेदः सरूपस्यानुदुर्लक्ष्यःतदेतदितिज्ञापकत्वमस्यविघटयति। अत्रपार्योपदेशपारंपर्या तुरुशा एक॰
यतेअनुवर्ततेविभाषेति। तस्मात्त्रिव्यंजनसंयोगअवगाप्याणुदितिणाकारेणग्रहणात् कृतोनवकारेणेतिसिद्धं ॥ ॥ ॥ ३३

66

लगःसंदेहोभवतीति। किं प्रत्याहाराणामपितेषां ग्रहणमितिसंदेहः नहिकेनचनइति। नन्वत्योणामनुपानस्केतिदृत्तेकर्त्तव्येनहोपस्त्यं
३सामध्यारंउअण्लणं३
श्व
लाणात्प्रयंणाकारोहिस्तुवध्यते पूर्वश्चैवपरस्तत्रास्यग्रहणेऽपि एग्रहणेपुचसंदेहोभवतिपूर्वेणावास्युःपरेणावेति क
तास्मिंस्तावदणग्रहणेसंदेहःद्रलोपेपूर्वस्यदीर्घोणइति। असंदिग्धंपूर्वेणनपरेण। कुत एतत्। परेणाद्यात् नहि
द्रलोपेपरेणःसंति। ननुचापमाति-आतृढ आतृढइति। एवंतर्हिसाध्यर्थात्पूर्वेणानपरेणापदिहिपरेणास्यात्
अणग्रहणमनर्थकंस्यात्ढ्लोपेपूर्वस्यदीर्घोचइत्येवब्रूयात्। अथवैतदपिनब्रूयात्। अचोस्येतद्भवति
द्रस्वोदीर्घःप्लुतइति। अस्मिंस्तर्ह्यणग्रहणेसंदेहःकेणइति। असंदिग्धंपूर्वेणातपरेण कुतएतत्यणभावा
तानहिकेपरेणाःसंति। ननुचअयमस्तिप्रीकानौकेति। एवंतर्हिसामर्थ्यात्पूर्वेणानपरेणापदिहिपरेणा
स्यात् अणग्रहणमनर्थकंस्यात्। केचरत्सेवब्रूयात्तत्र चवैतदपिनब्रूयात् अचोस्येतद्भवति। द्रस्वोदी
र्घःप्लुतइति
सिद्धत्वात्स्तिकेपरतोहकारणत्याणिकेत्यादौरेफः। अत्राहुःनमुनइत्यत्रयो णाविधाणेनधनादीनामसिद्धत्वाभावात्तेषुचक्रलेपुलकारा
दिभावभावः ॥

67

भा॰वै॰ ३४ नहिपदांताइति। ननुचभोभगोअघोअपूर्वस्याश्यग्रहणस्यप्रयोजनंवक्ष्यते। हलश्वकरोतीत्यत्रहलिसर्वेषामितिलोपोमाभूदिति। तत्कथमुच्यतेनहि अ॰१ पा॰१
पदांताइति। उच्यते अप्रगृह्यस्येतिपर्युदासेनाचएवानुनासिकेनभाव्यंनतुहलस्यकंनहिपदांता इतिकार्यभाजइत्यर्थः अवोः प्रगृह्यस्ये
तिहलोहिनभाव्यमित्यत्राश्यग्रहणसामर्थ्यात्सर्वेषांनेतिस्थितं। तत्रअदंतस्तत्रदूश्यतेति किंपिकृतेहस्वभ्रमावधरा। तेणीविदिलोपेचकृतेत्व
२ मध्यमपदलोपहणसारे
अस्मिंस्तद्येश्यग्रहणेसंदेहः अरणोप्रगृह्यस्यानुनासिकइति। असंदिग्धंपूर्वेणानपरेणाकुतएतत्यणाभावात। नहिपदांताः
परेणाःसंतिननुतत्रअयमस्तिकर्तव्यहर्तः एवंतर्हितत्सामर्थ्यात्सर्वेणानपरेणायदिहिपरेणास्यात् अश्यग्रहणमनर्थकं
स्यात् अवोप्रगृह्यस्यानुनासिकइत्येवब्रूयात। अयवेतदपिनब्रूयात। अचएवहिप्रगृह्यापवंति। अस्मिंस्तर्हिश्यग्रहणे
संदेहःउरणप् परइति। असंदिग्धंपूर्वेणानपरेणाकुतएतत्। परणाभावात। न[redacted]स्य:स्थानेपरेणाःसंतिननुचअयमस्ति
कर्तृथेहत्रेथ्योमितिकिंचस्यात्यद्यत्रपरत्वंस्यात् द्वयोरेफयोःश्रवणंप्रसज्येत हलोयमांयमिलोपइत्येवमेकस्या
त्रलोपोभविष्यतीतिविभाषासलोपःविभाषाश्रवणंप्रसज्येत। अयेतर्हिनित्योलोपःरोरीति। यदांतस्येत्येवसः
नशकारःसपदांतस्येत्येवंविशात्तुरहाहलोपोनस्यात्। तर्गथेनेदुश्वलर्घाः पास्पर्द्धे:अपास्पाइति
श्वयतेर्दिविकृतेहलश्वतिभवति। किंपितर्कोलुर्हङ्कोविधिंप्रतिचनस्थानिवदितिनिषेधात्तेप्रसारणप्रसंगःलोपोव्योर्वलीति
लोपप्रसंगाश्च। किंचेतुस्थानिवद्वावाद्धलनिमित्तोलोपोनभवतिहलिसर्वेषामित्यनेनतुलोपेकियमाणेपूर्वत्रासिद्धेनस्थानिवदि
तिस्थानिवत्वनिषेधाद्धलोपःप्राप्नोतिअश्यग्रहणात्तुरूपानिवर्तते। अलर्थाइति। गृधेर्यङ्लुकिरुगागमेव्यासस्यकृतेलोङे स्ति णम॰
विशह्लुकिगुणारपरत्वात्तिपलोपभवेश्वभावत्तश्चरुत्वरलोपदीर्घत्वेषुरूपं ॥

68

रहाचितहीति। धातुग्रहणेनहिलिंगेनाधातोरेवरपरत्वंनिवर्तिंतंधातोस्तुरपरत्वेसत्यनंत्यत्वात्तत्रप्राप्नोतीतिश्नश्च इहापीति। तस्माद्धातु
ग्रहणस्यसप्रयोजनत्वान्नज्ञापकत्वमित्यर्थः। स्वर्णोइति। अजीकृतइदि। तेऋकारस्यऋकारएवयथास्यात्। ऋकारोमाभूदित्येवम
र्थेनपरत्वंकिपतेयदिपर्वेणाकारेणाणग्रहणंस्यात्तत्ऋकारेणाणत्वाद्विकालस्यत्राहकएवनभवतीतिऋकारोनैवस्या
ग्रह[redacted]तर्हिमातृणांपितृणामितिरपरत्वंप्रसज्येतआचार्यप्रवृत्तिर्ज्ञापयति नात्ररपरत्वंभवतीतियदयमृतइद्धातोरितिधा
तुग्रहणंकरोतिकथंकृत्वाज्ञापकंधातुग्रहणस्येतत्प्रयोजनं। इहमाभूत। मातृणांपितृणामिति। यदिचात्ररपरत्वंस्यात्तथा
तुग्रहणमनर्थकंस्यात। रपरत्वेकृतेअनंत्यत्वादित्वंनभविष्यति। पश्यतित्वाचार्यःनात्ररपरत्वंभवतीति। ततोधातुग्रहणं
करोति इहापितर्हिनप्राप्नोति। चिकीर्षतिजिहीर्षतीति। मामूदेवंउपधायाश्चेत्येवंभविष्यति। इहापितर्हिप्राप्नोति। मातृणां
पितृणामितितस्मान्नधातुग्रहणंकर्तव्यं। एवंतर्हिसामर्थ्यात्सर्वेणानपरेणायदिपरेणास्यात्तत्रअणग्रहणमनर्थकंस्या
त्। [redacted]उरणपरइत्येवब्रूयात। अस्मिंस्तर्हिणग्रहणेसंदेहः अणुदित्सवर्णस्यचाप्रत्ययइति असंदिग्धंपरेणनपूर्वे
ण[redacted]कुतएतत्संवर्णग्रहणंपरहुन्तं।यदयंअर्केदितिलपर[redacted]करोतितज्ज्ञापयत्याचार्यःपरेणन ककारं
पूर्वेणेति। णग्रहणेषुतर्हिसंदेहः असंदिग्धंपरेणनपूर्वेणकुतएतत्। अन्यत्रपरेणाणस्यात्। यत्रेच्छतिपूर्वेणास्म
घग्रहणंतत्रेकरोतिर्तिइति। नचगुरुभवतिकथंकृत्वाज्ञापकं तत्राचिभक्तिनिर्देशेसंदेहघग्रहणेअर्केचतत्रोमात्राःप्रत्या च
हारग्रहणेषुलाशितोमात्रालोपमेर्वलघीवसात्मामेजामिडेहेत्तिलियद्वदीपोसंप्रत्यनमा।धतेतत्तज्ञापयत्याचार्यःपरेणनपूर्वे
णेति। किंपुनर्वर्णोत्सवाविषअयंणकारो। द्विरनुबध्यतेएतज्ज्ञापयत्याचार्यःभवत्येषापरिभाषाव्याख्यानतोविशेषप्रतिपत्ति
र्नहिसंदेहादलक्षणमितिअर्थवत्संवर्णोपरिहाघपर्वेणणग्रहणंहिपरेणेणग्रहणमितिव्याख्यास्यामः
सीनाप्यादेशःप्रसज्जतीति। किंतपालेनकृतंचतत्तावकंपरेणाणग्रहणंअदंतत्स्वरानि। अदेनचतत्रःचतुर्थीद्विमात्रात्रा ईमितिकिंपु
नरिति। वर्णात्सवर्णाछेदः वर्णांतरमनुबंधःकिंनाक्रिपतत्वस्पर्थे। व्याख्यानतरति। न्यायाद्गमाद्भाषाद्राःस्रौनसौलोपसर्थः ॥
स्म॰२ ६१

ऽम्न्त्रा॥ न इकारेति। भकारस्यापरांतस्य तत्स्थेन भाव्यमिति तस्याभावः। तुल्यो ओकारः संयोगांतस्येति लुप्यत इति तस्याप्यभावः संहृतावितिः॥
दृष्टानुदेशाभ्यां संख्यासाम्याद्यथासंख्ये तत्त्वे प्रयोगोपस्थानमीविद्यते सप्रवर्तते नान्य इत्यर्थः। किमिदमिति। अक्षरसमाम्नायपदति व्यवहारा
घोवा इमां स्वस्फोटन्तर इति चोरूस्तात्प्रश्नः अक्षरं न क्षर मिति किं पाशब्दोपनिस्रस्यार्थे स्यवाचक इति दर्शयति। अत्राक्षियः क्षरतेर्वाविन्ना

जपद्र·गालमश्नुश्नभज्ञ॥ किमर्थमिमो परवनासिकावचनो वर्णावुभावप्यनुबध्येते। नञकारएवानुबध्येत कथं यानिमकारेणप्रत्याहार
ग्रहणानि हलोयमां यमिलोपइति। सं तु ञकारेणा हलोपञ्जां यञिलोप इति नैवं शक्यं। ञकारमकारयोरपि ञकारमकारयो
र्लोपः प्रसज्येत। न ञकार मकारो ञकार मकार उपदेशेः कथं पुनः स्व प्यमपर इति। एतदप्यस्त्ञकारेण प्रमः स्वम्यञप
र इति। नैवं शक्यं ञकारमकारपरेऽपि हि स्वपिरूपं प्रसज्येत। न ञकारमकारपरः स्वयास्ति कथं ऽमोऽखाद्रचितिश्चुगिनित्यमिति
। एतदप्यस्त ञकारेणा ञोऽनुस्वारच ऊञुगिनित्य। कि ति नैवं शक्यं ञकारमकारयोरपि हि परतो ञकारमकाराबागा
मौस्यातां। न ञकारमकारौ परतौ स्तः एवमपि यंचागमास्तेयञ्चागमिनः वे यम्यात्संख्यातानुदेशेन प्राप्नोति। सं तु ता
वद्येवामागमानामागमिनः। सं ति ञकारमकारौ परतौ न स्त इति कृत्वा आगमावपि न भविष्यतः। अथ किमिदम
क्षरमिति। अक्षरं विधात। न क्षीयते न क्षरती। तिवा। क्षरं। अश्नोतेर्वासरोक्षरं। अश्नोतेर्वा पुनरयं मोगादिकः सरप्रत्ययः
१ न क्षरं १ अश्नुतत्स्थन्तरं वर्णाहुः पूर्वसूत्रे॥ अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते ॥ ॥
शार्थस्य तन्पूर्वस्य रूपानत्त्ववृत्तल परमार्थतो नित्यं व्यवहारनित्यतयात्तु वर्णोपस्थाप्यस्फोटानां नित्यत्वमज्ञाति स्फोटस्यवा। अश्नोते
र्वैति। सरप्रत्ययस्यानुबंधलोपे कृते अनुकरणां सर इति तत्रार्थमश्नुते व्याप्नोतीत्यक्षरं पर्दकाकां वा। वर्णावाहुरिति हृद्धिरिव्यं वर्णस्ये
त्यर्थः पूर्वसूत्र इति व्याकरणांतरे वर्णाक्षराणीति वचनात्॥ ॥ ॥

किमर्थमिति। वर्णानां साधकत्वस्या प्रतिपाद्यत्वात्पदस्यैव साधुत्वाद्वारम्भाना प्रश्नः वर्णो ज्ञानमिति। वर्णो येन शास्त्रेणा ज्ञायं तेन तद्वाच्यो विष
यः शास्त्रेणा वाविधीयं ते आवध्यते तस्माः परिज्ञानादित्यर्थः। अत्र चेति। ब्रह्मवेद्ः पदे वर्णेनैतस्य च शास्त्रं विषय इत्यर्थः। तदर्थमि
ति। शास्त्र प्रत्यर्थमित्यर्थः इत्यनुच्यर्थमिति। कल्लारिदोषरहितज्ञानार्थमित्यर्थः क्ल द्य र्थमिति। अनुबंधकरणार्थमित्यर्थः नाक्
समाम्नाय इति। एतावद्भिरेव वर्णैर्वाग्व्यवहार इत्यर्थः पुष्पितः फुलित इति हृष्टादृष्टफलाभ्यामभ्युदयनिः श्रेयसाभ्यां वाच्च इत्यार

श्रुः त्रि

किमर्थमुपदिश्यते। अथ किमर्थमुपदिश्यते वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते तदर्थमिष्ट बुध्यर्थं लघ्वर्थं
चोपदिश्यते सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चंद्र तारकवत्प्रतिमंडितो वेदितव्यो ब्रह्म
राशिः सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति माता पितरौ चास्य स्वर्गे लोके महीयेते। इति प्रथमस्या
ध्यायस्य प्रथमे पादे द्वितीयमाह्निकं ॥

कवाक्षितिअनादित्वान्नित्यत्वं वाग्व्यवहारस्य सत्त्वपति। ब्रह्माराशिरिति ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थः सर्ववेदे
ति। सर्ववेदाध्ययनकृतस्य पुण्यस्य यत्फलं तत्प्राप्नोतीत्यर्थः मातापितराविति। माहात्म्यातिशयः शास्त्रस्य प्रत्याहार
फलाख्यानद्वारेणाख्यायते। महीयेते इति पूजां प्राप्नुत इत्यर्थः महीयशब्दः कंड्वादिपठितः तस्य पाध्यायकस्य पट पुत्रक्यटकृ
ते भाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰कै॰
१

श्रीगणेशाय नमः॥ वृद्धिरादैच् ॥ कुतः कस्मादिति। अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनिर्विनियोगात् निरूपणादवसर्वसंज्ञानां लौकिकत्वादादैचां वृद्धिसंज्ञा अनुकरणशब्दत्वात्तत्तावृद्धिशब्दशास्त्रप्राप्तिरस्तीति प्रश्नः॥ तत्र कुशब्दः पंचम्युवर्णोच्चारणे रूपस्य प्रयोगात्मकत्वेन निपुणः इति शब्दस्य संज्ञिनिमित्तेन वप्रत्ययः छंदेवदिति। नवेत्येवमादिष्वाशिष्यसंग्रहव्याकरणात् तत्त्वाय वृद्धिर्वश्यं छंदोवदिति किं पुनरितिशयथाशास्त्रे दर्शनात् तत्र वृत्ये   अ॰१पा॰१

श्रीगणेशाय नमः॥ वृद्धिरादैच् ॥ कुतः कस्मान्न भवतीत्येवोक्तः परस्य लिम तात्। कथं भसंज्ञा। अयस्मयादीनि छंदसीति छंदसीत्यच्यते न चेदं छंदो वक्तव्यम् भवति। पश्चिमसंज्ञा वृद्धिरादैज्‌देङ्‌गुणस्ततिः भसंज्ञाप्रयोगः प्राप्नोति भयसंज्ञा पूर्वं संज्ञास्ति दृश्यते। तद्यथा समुद्भासः अनुकृतानाम्। वक्ताकुसंभवान्नपशुं न भवति। एवमिहापि पदत्वात् अस्मभत्वात् कुत्वं न भविष्यति। किं पुनरिदं तद्भावितग्रहणं वृद्धिरित्येवं आकारैकारौकाराणां भाव्यन्ते तेषां ग्रहणमाहोस्विदादैज्‌मात्रस्य किं चातः यदि तद्भावितग्रहणं शालीयो माली यइति वृद्धलक्षणः छो न प्राप्नोति आम्रमयं शालमयमिति वृद्धलक्षणो मयट् न प्राप्नोति आम्रगुप्तायनिः शालगुप्तायनिः वृद्धलक्षणः फिञ् न प्राप्नोति। अथादैज्‌मात्रस्य ग्रहणं सर्वभासः सर्वभासस्य तत्पुरुषे दृढो सर्वश्चेत्येव विधिः प्राप्नोति। तत्र ता वती भायो पस्यता वद्भाव्यः य। उदार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोति। अस्तु तर्हि अविशेषात्तस्य ग्रहणं। ननु चोक्तं सर्वभासः सर्वभासस्य तत्पुरुषे दृढो मर्वे चेत्येव विधिः प्राप्नोतीति नैष दोषः नैवं विज्ञायते उत्तरपदस्य वृद्धिः तत्र एषा वृद्धिः उत्तरपदस्य वृद्धिरिति कथं तर्हि उत्तरपदस्येत्येवं प्रकृत्य या वृद्धिस्तद्वत उत्तरपदस्येत्येवमेतद्विज्ञायते अवश्यं चैतदेवं विज्ञेयं तद्भावितग्रहणे सत्ययि दृश्यते सर्वकारकः सर्वकारकस्य तत्पुरुषे दृढो यदप्युच्यते हतीवता भायोपस्ता वद्भाव्यः यावद्भार्य इति च। वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोतीति नैष दोषः नैवं विज्ञायते। वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति। किं तर्हि वृद्धिर्निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तस्येति। किं च वृद्धेर्निमित्तं यो सौ ककारो ञकारो णकारो वा ॥ ॥ ॥   एम॰

विद्यासद्भावात्। अथवा उत्तरपदस्येत्येवमिति। तत्र वृद्धिरहेतोः सर्वचेत्यप्यमाने वृद्धिमात्रं स्याभावात्सामर्थ्याद्वृद्धिमदुत्तरपदं ग्रहीष्यतिस्यति। त्यमान्तसुत्तरपद

मवग   इत्यत्रहणसामर्थ्यादुत्तरपदस्थिकारेमयतिः हृद्धेर्निमित्तस्येति निमित्तशब्दोपादानसामर्थ्याधिकरणपदो बहुव्रीहिराश्रीयते। अन्यथा वृद्धेस्तद्धित

स्येत्येव ब्रूयात् वृद्धिनिमित्तत्वात् तद्धितस्य तद्धित एव वृद्धिशब्देनाभिधास्यते अथ वा वृद्धेस्तद्धितश्चेति वैयधिकरण्येन षष्ठीं आश्रयिष्यते॥

×स्योत्तरपद २४   ५१

अथवेति निमित्तशब्दोपादानादेवाश्रितबहुव्रीहित्वं संस्योदृद्धिशब्दः समस्यते वृद्धीनां निमित्तं वृद्धिनिमित्तमिति। संज्ञाधिकार इति वार्त्तिकं तस्य व्याख्यानमन्यसंज्ञेत्येवमिति। अथ शब्दसंज्ञायाः प्रस्तावद्योतनार्थः वृद्ध्यादौ नमिति संप्रत्ययस्येति तदपेक्षयाकर्मणि षष्ठी। वृद्ध्यादयः संज्ञात्वेन यथा प्रतीयेरन्निति अर्थः। यथालोके इति। कात्यायनेन असंप्रत्यये लोको दृष्टान्तत्वेनोपात्तः भाष्यकारस्तु वाक्याध्याहारेणानर्थकत्वे लोकं दृष्टान्तत्वेन योजयति। वदुस

अथवा यः कृत्स्नायाः वृद्धेर्निमित्तं कश्च कृत्स्नाया वृद्धेर्निमित्तं। यस्त्रयाणामाकारैकारौकाराणां। संज्ञाधिकारः संज्ञासंप्रत्ययार्थः। अथ संज्ञेति प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः। किं प्रयोजनं संज्ञासंप्रत्ययार्थः वृद्ध्यादीनां शब्दानां संज्ञेत्येषसंप्रत्ययो यथा स्यात्॥ इतरथा ह्यसंप्रत्ययो यथा लोके। अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञेत्येष संप्रत्ययो न स्यात्। इदमिदानीं बहुसूत्रमनर्थकं स्यात्। अनर्थकमिव स्यात्। कथं। यथा लोके। लोके ह्यर्थवन्ति चानर्थकानि वाक्यानि दृश्यन्ते।
अर्थवन्ति तावत्। देवदत्त गामभ्याज शुक्लां देवदत्त गामभ्याज कृष्णामिति। अनर्थकानि॥ दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति ॥ ५२ ॥ ॥

त्रमिति वृद्धौ हि प्रकरणाद्वान्यपदार्थः समाहारे द्विगुर्वा। अर्थवन्तीति वेति। यथा लोकेऽर्थवन्तीत्यन्वये एवमनर्थकान्यपीत्यर्थः यावत्प्रमाणायेस्य सम्बाधितं तावदनर्थकत्वमोक्ता। कथितसमन्वयानवगमाद्वा दश दाडिमानीति॥ पदार्थानामसमन्वयाद्वा दशानर्थक्यं ॥ ॥ ॥
६

भा॰कै॰ ३ आचार्याचारादिति। आचार्याणां व्यवहारादित्यर्थः। वृद्धिशब्देनैव वृद्धिशब्दस्य प्रत्यायनशक्तिर्व्यक्तिर्नैव प्रकाश्यते। यथादेचां वर्णानामिति बूमोऽत्र। अ॰१पा॰१
२ अपर इति। प्रदेशाद्वासंज्ञाभिव्यक्तिः संज्ञासंज्ञार्थात् प्रदेशार्थस्य व्यवस्थेत्यर्थः। अनाकृतिरिति। आकृत्या साह्चर्यादिदोऽलक्ष्यते तेनायमर्थः।

× संज्ञा २

संज्ञासंज्ञ्यसंदेहश्च। क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः। कुतो ह्येतत्। वृद्धिशब्दः संज्ञा। आदैचः संज्ञिन इति। न पु
नरादैचः संज्ञा वृद्धिशब्दः संज्ञीति। यदपि तावदुच्यते। संज्ञाधिकारः कर्तव्यः संज्ञासंप्रत्ययार्थ इति। न कर्तव्यः। आचार्याचारात्संज्ञा
सिद्धिः। आचार्याचारात्संज्ञासिद्धिर्भविष्यति। किमिदमाचार्याचारादिति। आचार्याणामुपचारात्। यथा लौकिकवैदिकेषु। तद्य
था लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति। त
योरुपचारादन्येऽपि जानन्तीयमस्य संज्ञेति। वेदे याज्ञिकाः संज्ञां कुर्वन्ति। स्फ्यो यूपश्चषाल इति। तत्र भवतामुपचाराद
न्येऽपि जानन्तीयमस्य संज्ञेति। एवमिहापि। इहैव तावत्केचिद्व्याचक्षाणा आहुः वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति। अ
परे पुनः सिचि वृद्धिरित्युक्त्वा आकारैकारौकारानुदाहरन्ति। तेन मन्यामहे। येयमाख्यायते सा संज्ञा ये प्रतीयन्ते ते संज्ञिन इति।
यदप्युच्यते क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्य इति। संज्ञासंज्ञ्यसंदेहश्च संज्ञासंज्ञिनोश्चासंदेहः सिद्धः। कुतः।
आचार्याचारादेव। उक्तम् आचार्याचारः। अनाकृतिः। अथवा अनाकृतिः संज्ञा। आकृतिमन्तः संज्ञिनः। लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते ॥

वृद्धिशब्द एकत्वात्संज्ञा। आदैचां त्वनेकत्वात्संज्ञित्वं। लाघवार्थं संज्ञाकरणं। यथा सर्वादीनि सर्वनामानीत्यनेकस्य एकासंज्ञा क्रियते। न त्वेक राम॰
स्यानेका प्रयोजनाभावात्। आकृतिमन्त इति। अवस्थाभेदेऽपि स एवायमिति प्रत्यभिज्ञानिमित्तं देवदत्तत्वादिकं सामान्यमस्तीत्याकृतिमत इत्यर्थः २

लिङ्गेन वेति कलादिनावर्णसंज्ञेति लोकेऽस्त्यर्थे तमेवोपालम्भेति। यो हि सूत्रकारस्योपालम्भस्तमकं तेस्त्वमिति स कथं हृत्विकारा न प्रामाण्येनाश्रयन्तीत्य
र्थः। आपरितुष्यन्निति। तथा विपरिहमन्तरं सुवृत्ता। आचार्याचारोऽप्रमाणत्वेनाश्रितस्तस्यार्थः। न ह्यापीति लिङ्गेन वेत्येतदुक्तं व्यमित्यर्थः। अनाकृ
तिः संज्ञेत्येतन्नन्यायसिद्धमनुवक्तव्यं। अयवितर्हीति। एवं सति प्रयोगः इकारादिष्वनुबन्धेषु कल्पस्किमासङ्ग्यते। ततश्च तेषां संज्ञात्वे सति इत्।
(२ तदीयस्य वृत्तिकारादेः)

लिङ्गेन वा। अथवा किंचिल्लिङ्गमासज्य वक्ष्यामि इत्थंलिङ्गा संज्ञेति। वृद्धिशब्दे च तल्लिङ्गं करिष्यते। नादैचः। इदं तावदयुक्तं यदु
च्यते आचार्याचारादिति। किमत्रायुक्तं। तमेवोपालभ्य तमकं तेस्त्वमिति तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तं। अप
रितुष्यन्खल्वपि भवाननेनपरिहारेण आकृतिर्लिङ्गेन वेत्याह। तच्चापि वक्तव्यं। यद्यप्येतदुच्यते। अथवैतर्हि इत्संज्ञा
न वक्तव्या लोपश्च न वक्तव्यः। संज्ञालिङ्गमनुबन्धेषु करिष्यते। न च संज्ञाया निवृत्तिरुच्यते। स्वभावतः संज्ञासंज्ञिनौ प्रत्याय्य
स्वयं निवर्तेते। तेनानुबन्धानामपि निवृत्तिर्भविष्यति। सिद्धस्त्वेवं आपाणिनीयं तु भवति। यथान्यासमेवास्तु। ननु चोक्तं सं
ज्ञाधिकारः संज्ञासंप्रत्ययार्थः इतरथा ह्यसंप्रत्ययो यथा लोक इति। नैष दोषः। लोके नया व्याकरणे पश्यन्तान्मृत आचार्यो
दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुखः उपविश्य महता प्रयत्नेन सूत्रं प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवि
तुं किं पुनरियता सूत्रेण ॥ ३॥

लिङ्गमनेकमिति करिष्यते संज्ञाचर्लस्तिर्न प्रत्याय्य स्वयं निवर्तेत रति इत्संज्ञा लोपश्च न वक्तव्यो भवत इत्यर्थः। प्रमाणभूत इति प्रामाण्यं प्राप्त इत्यर्थः। अप्रा
प्तविसस्य मुख्याद्देतिः जिज्ञासावपदेह्रुपक्षेविषये च प्रमाणशब्दः प्रमाणेषु वर्तते। दर्भपवित्रेति। प्रमादाभावं दर्शयति। प्राङ्मुख इति। प्राच्या अ
भ्युदयहेतुत्वात्। प्रहतेनेति। मनःप्रणिधानं दर्शयति। एतच्चसर्वं मुनिमाहात्म्यं द्योतनम् ॥ ॥ ॥ ॥ ॥

भा॰ कौ॰ एवमानर्थक्ये परिहृते संज्ञासंप्रत्ययार्थपर्यालोचनात् प्रश्नस्तवेन प्रतिशिष्यते । किमत इति । कतमन्नयोरिति आदैज्वृद्धिशब्दयोरिति द्विवचन अ॰ १ पा॰ १
३ निर्देशात् आदैज्वृद्धिरिति नांतः द्वंद्वनिर्देशो यमादैज्वृद्धयर्थः प्रयोगनियमार्थमिति । आदैज्वृद्धिरिति प्रयोगो प्रामादिकत्यर्थः नेत्युक्ते प्रयुज्यते इति
प्रयोगः तत्र स्वतंत्रस्य पदस्य प्रयुज्यमानस्य नियमो नारभ्यते । अभिधेयपदावयवस्य प्रकृतिप्रत्ययोपसर्गनागमादिरूपस्य । लोके च केवल

किं मतोपदर्शकं । अतः संज्ञासंज्ञिनावेव कुतो गुरुत्वेन तत्संज्ञासंज्ञिनावेवेति । न पुनः साध्वनुशासनेऽस्मिन् शास्त्रे साधुत्वमन्ते
न क्रियते । कतमन्नयोः साधुत्वं कुर्यात् । वृद्धिरित्यायविशेषणोपदिष्टः प्रकृतिपादे । तस्मात् क्रियन्तप्रत्ययः आदैजोऽप्यत्र समाम्ना
यउपदिष्टाः प्रयोगनियमार्थं तर्हि दृश्यते वृद्धिशब्दस्य आदैचः प्रयोक्तव्या इति नेह प्रयोगनियम आरभ्यते किं तर्हि संस्कृ
त्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबंधो भवति । तद्यथा । आहर पात्रं पात्रमाहरेति । आदेशास्तर्हि मे स्युः वृद्धि
शब्दस्यादैचः षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते । न चात्र षष्ठीं पश्यामः आगमास्तर्हि मे स्युः वृद्धिशब्दस्यादैच आगमाः आग
मा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते लिंगेन च न चात्र षष्ठीं न खल्वप्यागमलिंगं पश्यामः ॥ ॥

उ एवं वृद्धिशब्दः प्रयुक्त इति न तस्यानेन नियमः क्रियते लोके च प्रयुक्तानामिदमनुशासनं । षष्ठीनिर्दिष्टस्येति । स्थानषष्ठ्यर्थवाचीति एवं त्वस्मिन् षष्ठ्य
र्थ इति स्थानेन च वृद्धिशब्दार्थमादैचो वक्तुं शक्याः तेनात्र षष्ठ्यर्थाभावादिति तात्पर्यं । तथाहि । षष्ठ्यभावेऽपि तदर्थसद्भावाद्भवत्येव स्थाने आदेश ग॰
सद्भावः यथा तानि भेदः परस्त्रीपरत्वं चेति । आगमा अपीति । अत्राप्यर्थे वक्ष्यते आगमकानामर्थे स्थानेकाश्च त्यर्थे लिंगेन चेति । देशविशे ३
षपतिपत्तेर्मेरकारादिलिंगं तत्र क्रियत इत्यर्थः ॥

इदं खल्वपीति । विशेषणविशेष्यभावनिराकरणेन संज्ञासंज्ञिनोर्व्यतिरेकं दर्शयति । एवं च सति सामानाधिकरण्यं न त्वेकविभक्तित्वं । गौरश्व इत्यत्रैवे दे
कविभक्तित्वं न तु सामानाधिकरण्यमिति भयोः वादानां संज्ञासंज्ञिनोर्व्याप्तिविशेषणविशेष्यत्वप्रसिद्ध्यप्रसिद्धिभ्यां शास्त्रे नैवादानं तत्र सा
मानाधिकरण्यं द्वयोरेव केचिदिष्टं तिङ्व्याख्याभ्यां भिन्नप्रवृत्तिनिमित्ताभ्यामेकस्याधिकरणस्याभिधेयस्य प्रतिपादनाद्विशेषणा[illegible]
ह
इदं खल्वपि भूयः सामानाधिकरण्यं एकविभक्तित्वं च द्वयोः खेतद्भवति । कयोर्विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा । तत्रैतत्स्या
द्विशेषणविशेष्ये इति । तच्च नाद्व्योर्द्वयोः प्रतीतपदार्थकयोर्विशेषणविशेष्यभावः । न चादैच्छब्दः प्रतीतपदार्थकः तस्मात्सं प
ज्ञासंज्ञिनावेव । तत्र केतावान्संदेहः कः संज्ञी का संज्ञेति । स चापि क संदेहः यत्रोभे समाने भवतः यत्र त्वन्यतरल्लघु सा
संज्ञा कृत एतत् लघ्वर्थं हि संज्ञाकरणं । तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयितुमर्हति । किं तर्हि अनाकृतिता
मपि । अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः लोकेऽप्याकृतिमतो मांसपिंडस्य देवदत्त इति संज्ञा क्रियते । अथवा आवर्ति
न्यः संज्ञा भवन्ति । वृद्धिशब्दश्चावर्तते नादैच्छब्दः तद्यथा इतरत्रापि देवदत्तशब्द आवर्तते न मांसपिंडः ॥ ० ० ० ०

विशेष्यार्थे प्रतिपादनाद्विशेषणविशेष्यत्वं । अन्ये तु नीलमुत्पलमिति प्रवृत्तिनिमित्तयोर्जातिगुणयोरेकमधिकरणमाश्रय इति सा
मानाधिकरण्यं विशेषणविशेष्यभावं चार्थयोरेवमन्यते । न चादैच्छब्द इति । न ह्यस्य कश्चिल्लौकिकोऽर्थः प्रसिद्ध इति । आवर्तिन्य इति । देवद
त्तादिशब्दा हि स्नानादिक्रियासु नाम्नाय वर्तन्ते ॥ ॥ ॥

मन्त्री च ४ अष्टमेति। सप्तमतिवासंज्ञिनिवृत्ता। विपरीकृते शब्देनपूर्वेणनिर्दिष्टे संज्ञा प्रवर्तते तत्रत्यर्थः ततश्चादेकु गणसंज्ञा वदेशादयः संज्ञिनोसु गणस्य संज्ञा: अ० १ च० १
इहतमेगानार्थो यथापाठक्रमः। आर्थस्तु यथाक्रमः। चान्ये तु सिद्धिते तत्त्वोभविष्यति अवस्कं एकाल्प्रत्ययइति ह परिभाषानसंज्ञेति नास्ति

अथवा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा कुत एतत्। लतोऽहि कार्यिणः कार्येणाभवितव्यं। तद्यथा। प्रतनस्त्रापिसतोमांस
पिंडस्यदेवदत्तइति संज्ञा क्रियते। कथं ज्ञायते वृद्धिरादैजिति। एतदेकमाचार्यस्य मंगलार्थं मृष्यतां मांगलिक आचार्यो महतः शा
स्त्रौघस्य मंगलार्थं वृद्धिशब्दमादितः प्रयुंक्ते। मंगलादीनि हि शास्त्राणि प्रथंते वीरपुरुषकाणि च भवंति। आयुष्मत्पुरुषा
णि च अध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा अदेङ्गुण इति यथा। दे
वदत्तवत्त्वापि संज्ञाधिकारः अयमेवहि संज्ञा क्रियते तस्य परमा ऐ इति। मितिति। तत्रापि इदमनुवर्तिस्यात्। अथवा। आस्था
नेः पंयन्तः क्रियते। नहीदं लोकाद्भिद्यते यदीदं लोकाद्भिद्येत ततोपलं ईस्यात्। तद्यथा। गोज्ञाय कश्चित्सर्वानि
श्री कर्णौ वा गृहीत्वोपदिश्यते गौरिति। न चास्मा आचष्टे यमस्य संज्ञेति। भवति चास्य संप्रत्ययः न त्रैत तस्मात् कृतः तत्रपू
र्वैरभिसंबंधस्तिरहापि कृतः पूर्वैरभिसंबंधः केः आचार्यैः तत्रैतत्स्यात्। यस्मैतर्हि संप्रत्यक्ष परिशतितस्याकृत इति। लो
केष्विह्नियमेसंप्रत्यक्षपरिशतितस्याकृतः अथ तत्र कृतः इहापि कृतोद्रष्टव्यः ॥ ॥ ॥ ॥ ॥

अभिचारः अस्त्रक्षमाद्वे वदेकाकीकथ्यतइत्य [redacted] नियमेनग्रहणोप्राप्तेनियमः क्रियते। आस्थानइति। अंतरेणापि संज्ञाशद्वप्रयोगं लोकव्यवहा एष०
रवत्त्रसंज्ञासंज्ञिसंबंधः सिध्यतीत्यर्थः ४ ॥ ॥ ४

सतोवृद्ध्यादिष्विति। विधौ चायं दोषः नानुवादे वृद्धिर्यस्येत्यादौ। तत्रसंज्ञाविधानस्य चरितार्थत्वात्। न हि ज्ञेवृद्धिरित्यादौ वृद्धिशब्दादेशः प्राप्नोति।

सतोवृद्ध्यादिषु संज्ञाभावात् तदाश्रयत्वे तराश्रयत्वादप्रसिद्धिः सतः संज्ञिनः संज्ञाभावात्तदाश्रये संज्ञाश्रये संज्ञि
नि वृद्ध्यादिष्विति तेरतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता। सतामादैचां संज्ञया भवितव्यं संज्ञया चादैचो भाव्यं
ते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पंते। तद्यथा। नौ नौर्विबद्धा नेतरत्राणाय भव × तरे २
ति। ननु च भोः इतरेतराश्रयाण्यपि कार्याणि दृश्यंते। तद्यथा। नौः शकटं वहति। शकटं च नावं वहति। अन्यदपि तत्र
किंचिद्भवति। जलं [redacted] स्थलं वा स्थले शकटं नावं वहति जले नौः शकटं वहति यथा तर्हि त्रिविष्टब्धकं तत्रान्य
प्रा द्वेषु ततः सूत्रकं भवति इदं पुनरितरेतराश्रयमेव। सिद्धं तु नित्यशब्दत्वात्। सिद्धमेतत् कथं नित्यशब्दत्वात्। नित्याः शब्दाः
नित्येषु सतामादैचां संज्ञा क्रियते। न संज्ञया आदैचो भाव्यंते। यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रं। किमर्थं शास्त्र
मिति चेन्निवर्तकत्वात् सिद्धं। निवर्तकं शास्त्रं। कथं। मृजिरस्मा अविशेषेणोपदिष्टः तस्य सर्वत्र मृजि बुद्धिः प्रसक्ता।
तत्रानेन निवृत्तिः क्रियते मृजेरक्ङित्सु प्रत्ययेषु मृजिप्रसंगे मार्जिः साधुर्भवतीति ॥

क नत्त्वचभोउति नोशब्दस्याभिन्नतदेषां तराश्रितेतराश्रयेति चोद्यं। सामर्थ्यं तत्तनुप्रदेशेतोशब्दं। सिद्धं लिति। नहि मृजेरपूर्वं आकारो भाव्यते। किं
तुस्तनुपदिष्टमार्जिस्यादिनामसाधुत्वबुद्धिः प्राप्नोतीति तेषां साधुत्वाख्यानं क्रियते ॥ ॥ ॥
तरे

भा॰कै॰ ५ प्रत्येकमिति। पदविधिरङ्गनित्यत्वेनैतदपि व्यवतिष्ठते तथापि त्वयाभ्युपायोऽन्यासः। समुदायेमाभूतामिति। अन्यथाप्रत्येकं द्विरिष्यते। समुदायस्थादेशः प्राप्नोति समुदायावयवत्वं च्छिन्नो कृतात्पर्यंकस्य च तां तृतीयकस्य मिति विचार्यते। अन्यत्रेति भ्यसाभ्यां समुदाय प्रतिपत्तिः। तियत्वाभावेन भक्तीत्यर्थः। ननु सहत्वग्रहणं नियमार्थं स्यात्। समुदाय एव समाससंज्ञा यथा स्यात् नावयवानामिति नैतदस्ति। उभयत्रेतात्पर्याभावाद्व्यापदुप यत्र प्रसंगाभावाद्धि ग्रहणमेवं सहत्वग्रहणस्यान्यत्र समुदायेतात्पर्यं तावतीत्यस्यार्थस्य उभे अभ्यस्तं सहेति अत्र सहत्वग्रहणं वा

अ ङ्गिककारस्य कर्तव्यत्वेन। किन्तु भाष्यकारस्तु [illegible] हृतास्येतत्प्रयोजनं स्थापयिष्यति। प्रत्ययवयवं चेति। अत्र वाक्यशब्देन वाक्यार्थः फलमुच्यते भ

प्रत्येकं वृद्धिगुणसंज्ञे भवत इति वक्तव्यं। किं प्रयोजनं समुदायेमाभूतामिति। अन्यत्र सहवचनात्समुदाये संज्ञाप्रसंगः। अन्यत्र सहवचनात्समुदायेष्वः वृद्धिगुणसंज्ञयोरप्रसंगः यत्रेच्छति सहभूतानां कार्यं करोतितत्र सहग्रहणं। तद्यथा। सहभुवाउभे अभ्यस्तं सहेति। प्रत्ययवयवं च वाक्यपरिसमाप्तेः। प्रत्ययवयवं च वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा। देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति। नचोच्यते प्रत्येकमिति। प्रत्येकं च भुजिः परिसमाप्यते। ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं दण्ड्यन्तामिति अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति। सत्येतस्मिन् दृष्टान्ते यदि तत्र सहग्रहणं क्रियते इहापि प्रत्येकमिति वक्तव्यं। अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति इहापि नार्थः प्रत्येकमिति वचनेन॥

इ इ देवदत्तादीनां भोजनं तस्यैव तदेव रूपं प्रत्येकं परिसमाप्त्यां संपद्यते। अग्न्यारम्भादिरूपत्वात्तृप्तिफलत्वाच्च भोजनस्य। नार्थः किं यात्तु समुदाये स[redacted]माप्यते तौ तां शिक्षयाः समुदायरूपत्वात्तस्याः संयोगसंज्ञा न व र्थत्वात्समुदाये प्रवर्तते। वृद्धिसंज्ञा तु लक्ष्ये स्थानादेव दर्शनान्मालादीनां वेति लिङ्गाच्च प्रत्येकम् वर्तिष्यते। अर्थिनश्च गर्गाः शति। अत्र शतस्ये सिद्धमत्वात्प्राधान्यं अपादानत्वं त्वानप्राधान्यं गर्गाणां कर्म।। स्वगुणाभेदेन प्रधानस्य भेद इति शतं दण्डं समूहे समाप्यते। अर्थिनश्चेति। शतस्य प्राधान्यं प्रतिपाद्यते देश परायो हि वेरनां शतस्य प्राधान्यं न तेषां स्यात् दद्यात्। अथ तत्रान्तरेणेति। न्याय्यादर्थात्त्वात्सु समाससंज्ञायाः समुदायेष्वपि समाप्तेरिति द्वयोयो विभा पा॰ ५

त

[illegible]

गे२

अथ किमर्थमिति। किमाकृतिपक्षे भिन्नकाल निवृत्यर्थम् अथवाऽऽक्षिपस्ते गुणान्तरस्य कारणसंग्रहणार्थमिति प्रश्नः। आकारस्येति। व्य

द क्षिः पदार्थाभेदकाश्च गुणा इति दर्शने यद्गुणस्यैवोच्चारणं तद्गुणस्यैव संज्ञा प्रसंगुणान्तरस्य कानामपि संज्ञा प्रतिपत्त्यर्थं तपरकरणमित्यर्थः। किंतु का र्थं तपर

कर

अथ किमर्थमाकारस्तपरः क्रियते। आकारस्य तपरकरणं सवर्णार्थी आकारस्य तपरकरणं क्रियते। किं प्रयोजनं। सवर्णार्थी न

त परस्तत्कालस्येति तत्कालानां सवर्णानां ग्रहणं यथा स्यात्। केषां उदात्तानुदात्तस्वरितानां। किं च कारणं न स्यात्। भेदकत्वात्स्वरस्य भेदका उदात्तादयः कथं पुनर्ज्ञायते भेदका उदात्तादय इति। एवं हि दृश्यते लोके। य उदात्ते कर्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति। अन्यत्त्वं करोषीति। अस्ति प्रयोजनमेतत्। किं तर्हीति। भेदकत्वाद्गुणस्येति वक्तव्यं। किं प्रयोजनं। आनुनासिक्यं नाम गुणः तद्भिन्नस्यापि यथा स्यात्। किं च कारणं न स्यात्। भेदकत्वाद्गुणस्य भेदका गुणाः कथं पुनर्ज्ञायते भेदका गुणा इति एवं हि दृश्यते लोके। एकोऽयमात्मा उदकं नाम। तस्य गुणभेदादन्यत्वं भवति। अन्यदिदं शीतं अन्यदिदमुष्णमिति। ननु चाभेदका अपि गुणा दृश्यन्ते। तद्यथा। देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति। तथा बालो युवा वृद्धः वत्सो दम्यो बलीवर्द इति ॥ ॥ ॥ ॥ ॥

बली

स्वामिति। अभेदका हि गुणाः मुण्डेन हि कृतो ऽर्थो न कुंतालिलावस्थायामपि सोऽयमिति व्यपदिश्यत इति प्रश्नः भेदकत्वादिति। सर्वगुणसंग्रहार्थं गुणग्रहणं कर्तव्यमित्यर्थः एकोऽयमिति। उदकत्वजातियोगादेकत्वं न विवक्षितं। किं तर्हि विशिष्टमात्मानं स्वभावकुटकद्रव्यं तदेव च गुणान्तरयोगादन्यत्वेन लोके व्यपदिश्यते ॥ ॥

भा॰कि॰ ६ उभयमिति॥ आम्नायस्य हानियतस्वरात्तिर्वेदेषु गुणानां भेदकत्वं। लोके तु भयथा व्यवहारः। गोपिंडो वत्सा घवत्स्वामिभेदाच्च यविक्रयादिषु मूल्यादि अ॰१ ख॰१
दादौ देश्य वद्भणते स स्वायमिति प्रत्यभिज्ञानात् अभेदेनापीति प्रश्नः किंपुनरिति। अत्रेति शास्त्रे उदात्तमेवेति। तस्मात् शास्त्रे हितत्वोच्चारणाभावा
न्नांतरीयकत्वादुच्चार्यमाणोपि गुणाः प्रयत्नमंतरेणाप्न विवक्षितः इत्यर्थः। मधेवं कथमन्यत्रोक्तं उदात्तनिपातनं करिष्यते इति। यावत्तातत्राप्य

उभयमिदं गुणेषूक्तं भेदका अभेदकाश्चेति। किंपुनरत्र न्याय्यं। अभेदका गुणा इत्येव न्याय्यं कुत एतत् यदयमास्थिदधिस
६ क्थ्यक्ष्णामनङुदात्त इति उदात्तग्रहणं करोति यदि भेदका गुणाः स्युः उदात्तग्रहणमेवोच्चारयेत्। यदि तर्ह्यभेदका गुणाः
अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्स्वरितादेः स्वरितान्ताच्च प्राप्नोति। नैष दोषः। आश्रीयमाणो गुणो भेदको भ
वति। तद्यथा शुक्लमालभेत। कृष्णमालभेत तत्र यः शुक्ले आलब्धव्ये कृष्णमालभते न हि तेन यथोक्तं कृतं भ
वति॥

विवक्षा प्राप्नोतीति नैष दोषः। तत्रापि हि सूत्रे नैतरत्नमइति वचनादादेशस्य यः स्वरः प्राप्तस्तस्मिन्नुच्चारयितव्ये उदात्तो बाह्यप्रयत्नेन विवक्षार्थो वि एम॰
ज्ञायते। एवमनुनासिकस्य प्रयत्नाधिक्येनोच्चारणं विवक्षार्थमेव उक्तः ऊं इतियथा। अन्ये त्वाहुः। एकश्रुत्या सर्वत्र आशीयमानं इति। कश्चिद्दात्तो ६
च्चारणं तद्विवक्षार्थमिति। अनुदात्तादेरिति अनुपलक्षणार्थ्या अनुदात्तप्रकृतिः स्यादिति प्रश्नः उत्तरे लक्षणग्रहणमेव कुर्यादित्यभिप्रायः ॥ ॥
ति

व्याख्यानतः॥ इति प्रश्नः अद्रुमिस्याकरात्तलेसिद्धेमालादीनां चेति मालाशब्दस्य हृद्यार्थतानुपादानस्याकारप्रश्नेषु निश्चयः इत्यर्थः इदं तर्हीति। ननु तव्यपा
ना आदैचोराहकाननविर्ध्यति। नैतत् सिन्नत्र संज्ञाविधावादैचोभाव्यं तेर्किंतु ऐभिरणत्वात् त्रिमात्रचतुर्मात्राणामग्रहणात्तत्र प्रसंगाद्दृद्धिगुणवि

असंदेहार्थस्तर्हि तकारः। ऐजित्युच्यमाने संदेहः स्यात् किमिमावैचावेवाहोस्विदाकारोप्यत्र निर्दिश्यत इति। संदेहमात्रमेत
द्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। त्र्यादीनामग्रहणमिति व्या
ख्यास्यामः। अन्यत्रापि ह्ययमेवंजातीयके बहुलं प्रयत्नं करोति तद्यथा। औतोम्शसोरिति॥ इदं तर्हि प्रयोजनं आन्तर्य
तस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति। खट्वइंद्रः खट्वेंद्रः खट्वाउदकं खट्वोदकं खट्वाईषा
खट्वेषा खट्वाऊढा खट्वोढा। खट्वाएलका खट्वैलका। खट्वाओदनः खट्वौदनः। खट्वाऐतिकायनः खट्वैतिकायनः। खट्वाओ
पगवः खट्वौपगव इति। अथ क्रियमाणेपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा
न भवन्ति। तपरस्तत्कालस्येति नियमात्। ननु तः परो यस्मात्सोयं तपरः नेत्याह। तादपि परस्तपरः। यदि तादपि परस्त
परः ऋदोरप्पित्येव हि स्यात् यवः स्तवः लवः पवः इत्यत्र न स्यात्। नैष तकारः। कस्तर्हि। दकारः। किं दकारे प्रयोजनं। अथ किं त
कारे यदसंदेहार्थस्तकारः दकारोपि॥ अथ मुखसुखार्थस्तकारः दकारोपि वृद्धिरादैच् ॥ ॥

धोतेषामपि प्रसंगात् निषेधायतपरत्वाएवं स्थिते चोदयंति। यदोजर्थस्तकारस्तेनाकारस्य संबंधाभावात्कथमादित्येतत् पदं व्यक्तेता स्येयेनोन
र्थे तत्कारस्थोच्यते आनुबंधिकं त्वाकारार्थं संज्ञापकद्वारेणास्याकारप्रश्ने विज्ञायमाने प्रतिपत्तिगौरवं भवतीति सतितत्तकारेणाकारस्य स्वरूप
प्रतीतिः स्पष्टा भवतीति तकारसहितस्याकारस्य संनिधानुकार्यं प्रतिपादनार्थं वलादिभत्कत्वेत्रि सत्याशादित्येतत्संसिद्धं॥ ॥ ॥

भा॰कै॰ ७

२९

इको गुणवृद्धी। इग्ग्रहणात्ति। मिवक्ष्यमाणज्ञापकत्रयादाकारादिनिवृत्तिसिद्धेः किमेवमुपादीयते इग्ग्रहणमिति प्रश्नः। आत्संध्यक्षरेति। आकारादीनां स्थानित्वनिवृत्त्यर्थमित्यर्थः। आकारस्यान्तर्यात् स्थानिवृद्धिविधावभावाद्विशेषाभावाद्वाकारस्य ज्ञातोऽलोपस्तु तिलोपविधानाद्दकारस्य गुणप्रसंगः। उदाहरति। याता वाता इति। ग्लायतीति। एचो द्विमात्रत्वाविशेषात्स्यत्राधिकाभावादेकारोपदेशे ऐकारो गुणः स्यात् उंभितेति। भकारस्यार्धमात्रत्वादोकारो गुणः स्यात्।

इको गुणवृद्धी। इग्ग्रहणं किमर्थम्। इग्ग्रहणमात्संध्यक्षरव्यंजननिवृत्त्यर्थम्। इग्ग्रहणं क्रियते आकारनिवृत्त्यर्थं संध्यक्षरनिवृत्त्यर्थं व्यंजननिवृत्त्यर्थं च। आकारनिवृत्त्यर्थं तावत्। याता वाता। आकारस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति। संध्यक्षरनिवृत्त्यर्थम्। ग्लायति म्लायति। संध्यक्षरस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति। व्यंजननिवृत्त्यर्थम्। उंभिता उंभितुम् उंभितव्यम्। व्यंजनस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति। आकारनिवृत्त्यर्थेन तावन्नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति नाकारस्य गुणो भवतीति। यदयमातोनुपसर्गे क इति ककारमनुबंधं करोति। कथं कृत्वा ज्ञापकम्। कित्करण एतत्प्रयोजनं किति इत्याकारलोपो यथा स्यात्। यदि चाकारस्य गुणः स्यात् कित्करणमनर्थकं स्यात्। गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्यात् गोदः कंबलद इति। पश्यति त्वाचार्यो नाकारस्य गुणो भवतीति ततः ककारमनुबंधं करोति। संध्यक्षरनिवृत्त्यर्थेनापि नार्थः। उपदेशसामर्थ्यात् संध्यक्षरस्य गुणो न भविष्यति। व्यंजननिवृत्त्यर्थेनार्थः (margin: नापि)। आचार्यप्रवृत्तिर्ज्ञापयति न व्यंजनस्य गुणो भवतीति। यदयं जनेर्डं शास्ति। कथं कृत्वा ज्ञापकम्। डित्करण एतत्प्रयोजनं डिति टिलोपो यथा स्यात्। यदि व्यंजनस्य गुणः स्यात् डित्करणमनर्थकं स्यात्। गुणे कृते त्रयाणामकाराणां पररूपेण सिद्धं रूपं स्यात् उपसरजो मंदुरज इति। पश्यति त्वाचार्यो न व्यंजनस्य गुणो भवतीति ततो जनेर्डं शास्ति ॥

पररूपेणेति। अतो लोपस्तु न भवति। आर्द्धधातुकोपदेशे यदकारांतं तस्य लोपविधानात्। उपदेशसामर्थ्यादिति। प्रतिपत्तिलाघवार्थमेकारादेरुपदिष्टत्वात् (margin: एम॰ ७) यदयं जनेरिति। यद्येवमिग्ग्रहणमनर्थकं विधीयमानो ज्ञापकेनर्व्यंजनस्यानिरस्तत्वादिग्ग्रहणाभावात्सर्वादेशः प्राप्नोति। मिदर्मिदिरित्याश्रयणादिकारस्यै-वभविष्यतीत्यदोषः ॥ ॥

मात्रावदिति। विशेषणमिति यादृशाय सकलज्ञापकात्त्रयस्यैकेविदाहुः। टकः। किमेवं ज्ञापके नाकारनिवृत्त्यर्थत्वेनिराकृतो यदप्युच्यत इति ज्ञापकाद्ये पोऽप्रयुक्तार्थानुपस्थापितत्वात् सर्वेन कमेवमसर्वज्ञापकमंगोपन्यासं कृत्वा यथाभवं ज्ञापकसमर्थनं कर्त्तव्यम्। आयादयोऽपीति। ऐकारौकारयोरा-स्याकृतरूपश्रवणार्थत्वादिति भावः। यं विधिमिति। आयादेशस्यैकारो निमित्तमित्यायादेशो न बाध्यते। न हि तत्राप्यस्मिन्नेवं पाठः कर्तुं

नैतानि संति ज्ञापकानि। यत्तावदुच्यते कित्करणं ज्ञापकमाकारस्य गुणो न भवतीति उत्तरार्थमेतत्स्यात् तुंदशोकयोः परिमृजापनुदोरिति। यत्तर्हि गापोष्टगिति अनन्यार्थं ककारमनुबंधं करोति। यदप्युच्यते उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भवतीति। यदि यत्संध्यक्षरस्य प्राप्नोति तदुपदेशसामर्थ्याद्बाध्यते। आयादयोऽपि तर्हि न प्राप्नुवंति। नैष दोषः। यं विधिं प्रत्युपदेशो नर्थकः स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। गुणं च प्रत्युपदेशो नर्थकः। आयादीन्पुनर्निमित्तमेव। यदप्युच्यते जनेर्डवचनं ज्ञापकं व्यंजनस्य गुणो भवतीति। सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति। न च जनेर्गुणेन सिध्यति। कुतो ह्येतत्। जनेर्गुण उच्यमान अकारो भविष्यति न पुनरेकारो वा स्यादोकारो वेति। आंतर्यतोऽर्धमात्रिकस्य व्यंजनस्य मात्रिकोऽकारो भविष्यति। एवमप्यनुनासिकः प्राप्नोति। पररूपेण शुद्धो भविष्यति। एवं तर्हि गमेरप्ययं डो वक्तव्यः। गमेश्च गुण उच्यमान आंतर्यत ओकारः प्राप्नोति। तस्मादिग्ग्रहणं कर्तव्यम् ॥ ३ ॥ ॥ ॥ ॥ ॥

गम

त्पापात्तरत्यादिरूपासिद्धिप्रसंगात्। नव्यात्मेति च निपातनादात्वं गुणाच्च भविष्यतीति पररूपेणेति। रूपग्रहणस्यैतदेव प्रयोजनं गमाद्यकारस्य रूपं तादृगेव यथा स्यादिति। गमेस्त्वप्यमिति। सप्तम्यां जनेर्ड इत्यतो न्येष्वपि दृश्यत इत्यत्र ड इत्युवर्तमानं गमेरपि विधीयत इत्यज्ञापकं डित्वमिति व्यंजननिवृत्त्यर्थमत्राश्रितं ॥ ॥

भस्केच अ०१पा०१
८ संज्ञयेति। गुणाद् अनुवृत्तैव गुणाद् इकोऽधिकः सिद्धत्वादिति। यं गुणवृद्धिग्रहणमाश्रित्य गुणवृद्धिशब्दव्यापारार्थे विज्ञायते तेन गुणाद्यन्वयोपेतानां वृद्धिरित्येवं यावद्वृद्धिरिति विज्ञायते। अथवा गुणवृद्धिमात्रग्रहणे गुणवृद्ध्यधिकाराद् एव सिद्धे पुनर्गुणग्रहणं वृद्धिशब्दव्यापाराश्रयणार्थं विज्ञायते। वृद्धिरित्येवं यावद्वृद्धिरिति विज्ञायते। अथवा... देशादिति। पूर्वसूत्रे संज्ञिसंबंधस्योपात्तत्वाद् शब्दवृद्धिशब्दस्तादृश उत्तरत्रानुवर्तते इति आदेशमिच्छति। तेनेतत्तद्वृत्तीयं वृद्धिरित्यनुवर्तमान आदेशादिति।

यदीग्ग्रहणं क्रियते द्यौः पंथाः सः इममिति एतेपीकः प्राप्नुवंति। संज्ञया विधाने नियमः संज्ञयायेविधीयंते तेषु नियमः किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। गुणवृद्धिग्रहणसामर्थ्यात्। कथं पुनरंतरेण गुणवृद्धिग्रहणमिकोगुणवृद्धी स्यातां। प्रकृतं गुणवृद्धिग्रहणमनुवर्तते। क्व प्रकृतं। वृद्धिरादैजदेङ्गुण इति। यदि तदनुवर्तते अदेङ्गुणो वृद्धिश्चेत्यदेङां वृद्धिसंज्ञापि प्राप्नोति संबंधमनुवर्तिष्यते। वृद्धिरादैजदेङ्गुण इति। वृद्धिरादैच्च तत्त्स्थो गुणवृद्धी इति गुणवृद्धिग्रहणमनुवर्तते। आदेङ्ग्रहणं निवृत्तं। अथवा मंडूकगतयोऽधिकाराः यथा मंडूका उत्प्लुत्योत्प्लुत्य गच्छंति तद्वदधिकाराः ॥

इंद्रः प्रत्यायपत्तस्यादैचां गुणसंज्ञाप्राप्नोतीति संबंधं इति संबध्यत इति संबंधं कर्मणि घञ्नपुंसकस्याभिधेयलान्नपुंसकनिर्देशः आदेङ्ग्रहणं राम०
वृद्धिग्रहणमदेङ्गुण इत्यत्रानुवर्तते तादेङ्गुणैर्न संबध्यते इह त्वनुवृत्तसमादैचेति हणिताकां तारोत एग यत्पाणिस्वस्यागोपादाने। अथ वेति। वृद्धिशब्दस्येहाकांक्षाशब्दपरस्थानेन तदेङ्गुणस्त्र ॥ ॥ ॥

